# PRAUḌHA MANORAMĀ

WITH

# ŚABDARATNA

APPENDICES : 1-3

*Deccan College Monograph Series*

31-A

# PRAUḌHA MANORAMA
with commentary
# ŚABDARATNA

APPENDICES : 1–3

EDITED BY
**V. L. JOSHI**

DECCAN COLLEGE
Postgraduate and Research Institute
POONA

# PRAUḌHA MANORAMĀ

WITH COMMENTARY

# ŚABDARATNA

Appendices 1-3

EDITED BY

**VENKATESH LAXMAN JOSHI**

Vyākaraṇa Tīrtha, Vyutpatti Kovida, Sāhitya Viśārada etc.

Sometime Lecturer in Sanskrit at the School of Oriental and African Studies, University of London

Senior Shastri, Sanskrit Dictionary Department, Deccan College, Poona.

POONA

1964

*Code No.: 113-A*

Reprinted pages: 273 to 328 from
PRAUḌHA MANORAMĀ
with
ŚABDARATNA

500 Copies, December 1964

*ALL RIGHTS RESERVED*

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. G:796
Date 13.7.89
SIMLA

PH
491.2
J 78S

***Price: Rs. 4·00***

Library IIAS, Shimla
PH 491.2 J 78 S
G796

Printed by S. R. Sardesai, B.A., LL.B., Veda-Vidya Mudraṇālaya,
41 Budhwar Peth, Poona 2.

Published by Dr. S. M. Katre, M.A., Ph.D., for the Deccan Cllege
Postgraduate and Research Institute, Poona 6,

# FOREWORD

It is a matter of great good fortune that a critical edition of *Śabdaratna* is now being made available for the first time by Sri V. L. Joshi. There are many problems connected with this text which will become apparent by a persual of these appendices. Scholars have often wondered and at times posed questions regarding the mutual relationship between *Śabdaratna* and *Laghuśabdaratna* as also their authorship. Guesses have been made without relying on sound evidence. Sri Joshi has been able, with the critical study of Vaidyanātha Pāyaguṇḍe's *Bhāvaprakāśa*, to throw much welcome light on these problems, and established for the first time some semblance of order in these conflicting views. I am sure that the edition of *Śabdaratna* and these appendices which are being issued separately for the benefit of scholars will be welcomed by them in the same critical spirit in which they have been offered. I congratulate Sri Joshi on a piece of admirably painstaking work which will throw light on such a confused corner of medieval literary history and commend it to the notice of scholars of Sanskrit Grammar.

Deccan College, S. M. KATRE
19th December 1964.

# उपोद्घातः

महदिदं प्रमोदस्थानम् यदद्य *सशब्दरत्नप्रौढमनोरमायाः* परिशिष्टत्रयात्मकविभागस्य पार्थक्येन प्रकाशनं भवतीति। अनेन परिशिष्टत्रयेण *शब्दरत्नलघुशब्दरत्नयो*र्मिथः सम्बन्धः, *लघुशब्दरत्नस्य* कर्तृत्वं चात्र स्पष्टं भवेत्, इत्यस्माकं मतिः। गते एकशतसंवत्सरात्मके काले *लघुशब्दरत्नस्य* कर्तृत्वविषये वैयाकरणकुले अतीव सन्देहो दृश्यते। प्रायः सर्वेऽपि वैयाकरणाः *लघुशब्दरत्नस्य* कर्तृत्वविषये परम्परागतहस्तलेखानुसारं *हरिदीक्षित*कृतित्वमुक्त्वा 'परम्परातस्तावत् *लघुशब्दरत्नः नागेश*कर्तृकः, इति ज्ञायते' इत्येव प्रतिपादयन्ति। न दृश्यते तत्र हेत्वाद्युपन्यासपूर्वकं बाध्यबाधकप्रमाणप्रदर्शनपुरःसरं च विमर्शः; एतावत्कालपर्यन्तं बृहतः शब्दरत्नस्यानुपलब्धेः। इदानीं तु शब्दरत्नस्योपलब्ध्या *लघुशब्दरत्नस्य* कर्तृत्वविषये सम्यक् विवेचनं कर्तुं शक्येत। तदेव च यथायथं परिशिष्टत्रयेऽपि प्रास्ताविकेषु अभिनवोपलब्धशब्दरत्नाश्रयणेन सन्दर्भप्रकरणसङ्गतिप्रदर्शनपुरःसरं सविस्तरं विमृश्यते। अस्मिन् कर्मणि च *नागेश*शिष्याणां *भावप्रकाशकाराणां वैद्यनाथपायगुण्डेमहा*भागानां सर्वात्मना साहाय्यमुपलभ्यते, इति सर्वमेवेदं विवेचनं प्रमाणत्वेनैव स्वीकुर्युः विद्वांसः, इति दृढं विश्वसिमः।

किञ्च परिशिष्टत्रयेऽपि योग्यस्थलाभावादनुद्धृतो *वैद्यनाथपायगुण्डे*महाभागानामेकः श्लोकांशोऽत्र समुद्ध्रियते, येन अस्मिन् विषये तेषां मतं सुस्पष्टं भवेत्। सोऽयं श्लोकांशः *भावप्रकाशे* मङ्गलश्लोकेषु दृश्यतेः—

'गुरुं नत्वा श्रये बद्धशब्दरत्नेन्दुशेखरम्'

अस्मिन् श्लोके हि *पायगुण्डे*महोदयैः स्वगुरोः *नागेशस्य* 'बद्धशब्दरत्न' इति विशेषणदानेन पुरस्कारः कृतः। तदिदं प्रबलं वाचनिकं प्रमाणं *नागेशस्य लघुशब्दरत्न*कर्तृत्वविषये। तथापि शास्त्रीयपद्धत्या ग्रन्थान्तर्गतप्रमाणानामेव महत्त्वमधिकम्, इति जानन्त्येव शास्त्रमात्रप्रमाणा विद्वांसः। अत एव अत्रत्यपरिशिष्टानामनन्यसाधारणं महत्त्वम्।

तदत्र सारगर्भो निष्कर्षस्तु विदुषां पुरस्तात् विचारार्थम् सूत्ररूपेण उपस्थाप्यतेः—

(१) *नागेशभट्टैः* स्वयमेव नव्यमतप्रस्थापनार्थं स्वगुरुमतखण्डनप्रचुरः *प्रौढमनोरमाटीका*ग्रन्थः लिखितः।

(२) स्वगुरुकृतशब्दरत्नसादृश्यभ्रान्त्युत्पादनार्थं च स्वग्रन्थस्य *'लघुशब्दरत्न'* इत्याख्यां विधाय *नागेशभट्टैः* स्वगुरु*हरिदीक्षित*नाम्ना सः प्रकाशतां नीतः।

(३) *नागेशभट्टानां* साक्षाच्छिष्याः *पायगुण्डेवैद्यनाथभैरवमिश्रादयश्च* एतत् सर्वं सम्यक् जानन्ति ।

(४) किञ्च तदनन्तरं *नागेश*शिष्यैः सर्वैरपि नव्यमतप्रस्थापनाबुद्ध्या *नागेश*कृतलघुशब्दरत्नस्यैव सर्वत्र पुरस्कारं प्रकल्प्य मूलः प्राचीन(*भट्टोजिमत*)-परम्परानुयायी *हरिदीक्षित*कृतः शब्दरत्नः अनादृतः, अध्ययनाध्यापन-परम्परातो निष्कासितश्च ।

(५) अत एव च एतावत्कालपर्यन्तं *हरिदीक्षितकृतशब्दरत्नस्या*नुपलब्धिः । महता प्रयासेन च अष्टादशशतकस्यान्तिमे चरणे लिखिताः त्रिचतुराः हस्तलेखाः कथमपि लभ्यन्ते । वाङ्मयेतिहासे वैशिष्ट्यपूर्णस्यास्य विषयस्य विस्तरस्तु शब्दरत्नस्याङ्ग्लभाषाप्रस्तावनातोऽनुसन्धेयः ।

एतत् सर्वं कार्यं च अत्यन्तं क्लिष्टम्, जटिलम्, सूक्ष्मम्, गवेषणापद्धतिमन्त्र-तन्त्रमात्राधीनं चासीत् । अस्मिन् कर्मणि मान्यैः डॉ. एस्. एम्. कत्रेमहोदयैः सर्वात्मना साहाय्यं कृत्वा अहमुपकृतोऽस्मि । विशिष्य च डॉ. कत्रेमहोदयैः 'डेक्कन कॉलेज् मोनोग्राफ् सीरीज्'मध्ये अस्य परिशिष्टत्रयात्मकस्य विभागस्य अन्तर्भावं कृत्वा प्रकाशतां नीतमिदं परिशिष्टत्रयम्, इति तेषामुपकृतिभरान् वहामि । वेदविद्यामुद्रणालयसञ्चालकैः श्रीमद्भिः *सरदेसाई*महोदयैः क्लिष्टं कठिनं चेदं कार्यं नियतसमये परिसमापितम्, इति तेभ्योऽपि धन्यवादान् वितीर्य विरमति—

विदुषां विधेयः,
**जोशी वेङ्कटेशः**

पुण्यपत्तनम्
२१–१२–१९६४.

## अनुक्रमणिका



| | | | पृ० |
|---|---|---|---|
| (१) | Foreword | .... .... .... | ५ |
| (२) | उपोद्घातः | .... .... .... | ७–८ |
| (३) | भावप्रकाशस्थमान्यग्रन्थोद्धरणानि | परिशिष्टम् १ .... | २७३–२९४ |
| (४) | लघुशब्दरत्नकर्तुः स्वकीयान्यग्रन्थनिर्देशाः | ,, २ .... | २९५–३०६ |
| (५) | लघुशब्दरत्नेन कृतं शब्दरत्नस्य खण्डनम् | ,, ३ .... | ३०७–३२८ |
| (६) | Abbreviations and Corrections | .... .... | ३२८ |

# प्रथमं परिशिष्टम्

# प्रथमं परिशिष्टम्

## भावप्रकाशस्थमान्यग्रन्थोद्धरणानि

**प्रथमस्य परिशिष्टस्य विषये किञ्चित्:—**

शब्दरत्नप्रणेतॄणां हरिदीक्षितानां शिष्योत्तमाः सर्वतन्त्रस्वतन्त्राः नागेशभट्टाः; तेषां च शिष्येषु मूर्धन्यभूताः मीमांसाव्याकरणधर्मशास्त्रेषु कृतभूरिपरिश्रमाः वैद्यनाथपायगुण्डेमहाभागाः; इति तु सर्वविश्रुतमेव।

पायगुण्डेमहाभागैर्यद्यपि केचन प्रकरणग्रन्थाः स्वातन्त्र्येण विनिर्मिताः; तथापि प्राधान्येन नागेशभट्टानां नैकेषु ग्रन्थेषु विरचिताष्टीकाग्रन्थाः पाण्डित्यपरिपूर्णाः समुल्लसन्ति। तत्र लघुशब्दरत्नोपरि विरचिते [1]'भावप्रकाश' इत्याख्ये टीकाग्रन्थे 'इति मान्याः' 'इति मान्योक्तमपास्तम्' इत्यादि बहुवारं पायगुण्डेमहोदयैः मान्यग्रन्थोद्धारः क्रियते। तत्र 'के एते मान्याः?' 'कश्च तेषां ग्रन्थः?' एवमादयः प्रश्नाः प्रादुर्भवन्ति।

ननु 'मान्याः' इति केवलम् आदरसंसूचकः शब्दः सर्वेषामपि माननीयानां तत्तद्विशिष्टमतानुयायिनां प्राचीनवैयाकरणानां कृते अविशेषतया पायगुण्डेमहोदयैरुपयोजितः स्यात्, तर्हि किमर्थमयं व्यक्तिविशिष्टार्थनिर्धारणे क्लेशः; इति चेत्, अत्राहुः—

( १ ) पायगुण्डेमहोदयैः मान्यशब्दः केवलादरार्थकत्वेन नैव प्रयुज्यते। तथात्वे [2]'इति वदन्तो मान्याः मान्या एव' इत्येतादृक्षाः भावप्रकाशस्थग्रन्थाः असङ्गता एव स्युः। अत्र हि मान्यनाम्ना प्रसिद्धं पण्डितमुद्दिश्य आदरयुक्तत्वं नाम मान्यत्वं बोध्यते। अतः व्यक्तिविशिष्टार्थनिर्धारणे एव मान्यशब्दः पर्यवस्यति।

( २ ) किञ्च पायगुण्डेमहोदयाः [3]'प्रकाशकृन्मान्यरत्नाकरादयः' इत्यादिषु द्वन्द्वसमासेषु मान्यशब्दमन्तर्भावयन्ति। केवलादरार्थकत्वे अस्वाभाविकं हि तत्। अतोऽपि कारणात् मान्यशब्दस्य व्यक्तिविशिष्टार्थवाचकत्वमेव सिद्ध्यति।

( ३ ) किञ्च [4]'इति मान्यमतनिष्कर्षः' तथा [5]'इति मान्यमतानुयायिनः' [6]'इति मान्यशङ्कानुयायिमन्दोक्तिः' इत्यादि स्वकीये भावप्रकाशे पायगुण्डेमहोदयाः समुल्लिखन्ति। तदपि व्यक्तिविशेषबोधकपक्षमेव पोषयति।

---

1. *Praudha Manoramā* and *Śabdaratna* with *Bhairavī*, *Bhāvaprakāśa* and *Saralā*. Kāśī Sanskṛta Series 125.
2. *ŚR.* Page 278, lines 2-3, 7.
3. *ŚR.* Page 286, line 21.
4. *ŚR.* Page 293, line 8.
5-6. *Bhāvaprakāśa*, page 179.

( ४ ) अन्ततश्च सर्वोदाहरणातिशायि एकमेवोद्धरणम् अत्र समुल्लिखामः; येन *मान्यशब्देन* कः विशिष्टः पण्डितः *वैद्यनाथपायगुण्डे*महोदयानामभिमतः, तद् सुस्पष्टं भवेत्। तद् इदमुद्धरणम् *भावप्रकाशे* अजन्तपुंलिङ्गप्रकरणे अर्थवत्सूत्रे दृश्यते। तद् इत्थम् :—

"अत एव 'अर्थवत्सूत्रेऽर्थवत्त्वं सर्वं गृह्यते' इति *कौस्तुभे* पितामहचरणाः' इति *मान्योक्तिः* सङ्गच्छते।" [ *भाप्र.* पृ. ३२६, पं. २६, २७ ]

**मान्याः नाम हरिदीक्षिताः**

अत्र *भावप्रकाशकारैः पायगुण्डे*महोदयैः 'के नाम *मान्याः*?' इत्यस्य स्पष्टमेवोत्तरं दत्तम्। येषां पितामहचरणाः *शब्दकौस्तुभकाराः भट्टोजिदीक्षिताः* वर्तन्ते, ते एव *मान्याः*। *हरिदीक्षितानां* पितामहचरणाः *भट्टोजिदीक्षिताः* एव वर्तन्ते; इति तु निःसन्दिग्धमेव सर्वेषामपि विदुषाम्। अतः *भावप्रकाशे मान्यशब्देन* सर्वत्रोद्धृतेषु स्थलेषु *भट्टोजिदीक्षितानां* पौत्राः, *वीरेश्वरदीक्षितानां* पुत्राः *शब्दरत्नकाराः हरिदीक्षिता* एव उद्दिष्टाः, इत्यत्र नास्ति संशीतिलेशोऽपि।

( ५ ) किञ्च *शब्दरत्नेऽपि* तादृशाक्षरानुपूर्वीसहितः *भावप्रकाशोद्धृतः* प्रायः सर्वोऽपि ग्रन्थः याथातथ्येन समुपलभ्यते, इत्येतदपि महदुपकारकं *भावप्रकाशस्थमान्यग्रन्थ*निर्धारणे। किञ्च तत् प्रदर्शयितुमेव *शब्दरत्नस्थग्रन्थः*, *भावप्रकाशोद्धरणं* चेत्युभयमपि अत्र प्रथमे परिशिष्टे उपस्थाप्यते। उभयोर्ग्रन्थयोस्तुलनार्थं चिकित्साबुद्धया समुद्यतानां पण्डितानां तत्र वर्तमानम् असाधारणं साम्यम् अधस्तनपरिशिष्टग्रन्थात् स्पष्टं भवेत्।

**परिशिष्टस्य वैशिष्ट्यम्**

किञ्च अस्य प्रथमस्य परिशिष्टस्य एतदपि वैशिष्ट्यं कथयितुं शक्यते, यत् यत्र यत्र *मान्यग्रन्थोद्धरणं वैद्यनाथपायगुण्डे*महोदयैः क्रियते, तत्र तत्र प्रायः सर्वत्र *लघुशब्दरत्नेन शब्दरत्नस्य* (*'मान्य'*ग्रन्थस्य) अत्यन्तं सूक्ष्मतया, व्यङ्ग्यमर्यादया, मर्मग्राहिकतया च खण्डनं क्रियते। तच्च खण्डनं *लघुशब्दरत्नकारैः* ग्रन्थस्य ग्रन्थकर्तुर्वा नामोल्लेखं विना क्रियते; इति महती विप्रतिपत्तिरासीत् खण्डनविषयीभूतस्य ग्रन्थस्य ग्रन्थकर्तुर्वा निर्धारणविषये। अनेन प्रथमेन परिशिष्टेन तत् सुस्पष्टं ज्ञायेत, इत्यस्माकं विश्वासः।

किञ्च *लघुशब्दरत्नेन* अस्य *शब्दरत्नस्य* बहुषु स्थलेषु क्रियमाणं खण्डनं केवलमत्यन्तं सूक्ष्मेक्षिकयाऽवलोक्यमानम् एव महता प्रयत्नेनैव ज्ञातुं शक्येत, नेतरथा। *पायगुण्डे*महोदयैः तादृशि स्थलानि मर्मग्राहिकतया स्वीकृत्य, केन हेतुना, कया सरण्या,

काम् अरुचिं वा मनसि निधाय *लघुशब्दरत्नेन मान्यग्रन्थस्य* (*शब्दरत्नस्य*) खण्डनं क्रियते, तत् अतीव सरलया सुबोधया च सरण्या विवेचितम्, इति सर्वेषामपि विदुषामत्र प्रत्यक्षं भवेत्।

एतज्ज्ञानान्तरं '*लघुशब्दरत्नेन* कृतं *शब्दरत्नस्य* खण्डनम्' इति परिशिष्टमपि सरलं सुबोधं नातिक्लिष्टं च भवेत्। *पायगुण्डे*महोदयाः *नागेशभट्टानां* साक्षाच्छिष्याः। त एव हि *नागेश*ग्रन्थहृदयग्रन्थिं सम्यक् जानन्ति, अनायासेन उद्घाटयन्ति च; इत्यस्ति अन्येष्वपि *गदाप्रभृतिषु परिभाषेन्दु*टीकाग्रन्थेष्वस्माकमनुभवः। अतोऽपि कारणात् *भावप्रकाशस्थमान्य*ग्रन्थोद्धारस्य महत्त्वं वर्तते।

## पाठभेदमहत्त्वम्

अन्यच्च एतादृक्षु ग्रन्थोद्धरणेषु ये मूलग्रन्थस्थाः पाठा उपलभ्यन्ते, तेषां साहाय्येन चिकित्सकपद्धत्या पाठभेदविमर्शनावसरे मूलपाठनिर्धारणं समीचीनया रीत्या ऐतिहासिकपद्धतिमादृत्य, तर्कसुसंवादितया च याथातथ्येन कर्तुं पार्येत; इति महान् लाभः एतादृक्षाणाम् अन्यग्रन्थोद्धृतानां पाठभेदानाम्। एतच्च 'पाठभेदचिकित्साप्रकरणम्' इत्यस्मिन् परिशिष्टे पाठभेदविमर्शनावसरे सुस्पष्टं भवेत्।

## स्थलाङ्कादिनिर्देशपद्धतिः

अस्मिन् हि परिशिष्टे वामतः *शब्दरत्नम्*, तस्य अधस्तात् च पृष्ठाङ्कः पङ्क्त्यङ्कश्च। प्रतीकानि स्थूलाक्षरैरुल्लिखितानि; तथा ग्रन्थवाचकाः शब्दाः, ग्रन्थकर्तृवाचकाश्च शब्दाः, स्वीयासाधारणवैशिष्ट्यप्रतिपादकाश्च शब्दाः तिर्यगक्षरैरुल्लिखिताः पठनावसरे प्राधान्येन झटिति च तेषामुपस्थितये।

दक्षिणभागे च *भावप्रकाशस्थमान्य*ग्रन्थोद्धरणम्। अत्र हि **शब्दरत्नग्रन्थः** प्रायः सर्वत्र शब्दानुपूर्वीतः, क्वचिच्च अर्थतः समुपलब्धो भवति। यत्र शब्दानुपूर्वीतः *शब्दरत्न*ग्रन्थो लभ्यते तत्र पाठभेदज्ञानार्थम्, यत्र च केवलमर्थतः *शब्दरत्न*ग्रन्थो लभ्यते, तत्र सिद्धान्तसाम्यज्ञानार्थम् अथवा आशयसाम्यावबोधनार्थम्, अस्य परिशिष्टस्य महान् उपयोगः। *भावप्रका*शस्थ*मान्य*ग्रन्थस्य अधस्ताच्च केवलं पृष्ठाङ्क एव दीयते; न तु पङ्क्त्यङ्कः; इत्यप्यवधारणीयमिति।

शब्दरत्नम्

१. न च 'क् च ह् च कहौ', 'पुंसः कहौ' इति समासे 'पुमः खय्यम्परे' इति रुत्वप्रवृत्तिरस्त्येव, इति वाच्यम् ।

—पृ. २, पं. ९-१०

२. ननु निर्दिष्टपरिभाषा दुर्वारा । किञ्च अगतिकगतिरूपं योगविभागमाश्रित्य अन्योऽन्याश्रयपरिहारेण *आचार्या*शयकल्पनं न युक्तम् । अत एव 'हल्' इत्येकदेशावृत्तिमाश्रित्य 'हात् ल्' इति पञ्चमीसमासेन परस्पराश्रयपरिहारकल्पनमपास्तम्' इत्यरुचेराहः—**यद्वेति** ।

—पृ. ४, पं. २२-२५

३. क्लेशस्तु 'ङे प्रथमयोरम्' 'लसार्वधातुकम्' 'उदात्तस्वरितयोः' इत्यादावित्र प्राप्तस्थान्यादेशसम्बन्धबाध एव ।

—पृ. ५, पं. ११-१२

४. **चित्रगवीनामिति** । प्रत्यासत्त्या विभक्त्याक्षिप्तप्रकृतेः कवर्गवदुत्तरपदसमासरूपाया एव ग्रहणेन 'कुमति च' इत्यनेन णत्वं न, इत्यादि वक्ष्यामः ।

—पृ. ६, पं. २२-२३

५. अक्षधुरन्तः समास इत्यत्र सामीप्यार्थकषष्ठ्या तत्पुरुषः, इति दुराग्रहे तु 'अनेकाल् शित्' इत्यादिसौत्रसामीप्यार्थकबहुव्रीहिवत् *भाष्य*प्रामाण्यात् बोध्यः ।

—पृ. ७, पं. १४-१५

भावप्रकाशस्थमान्यग्रन्थः

एतेन 'पुम्कहौ' इत्युदाहरन्तो *मान्याः*, मान्या एव, इति ध्वनितम् ।

—पृ. ८

एतेन ''पूर्वपक्षद्वये 'निर्दिष्ट'परिभाषा दुर्वारा, इत्यतः **यद्वा** इति पक्षः'' इति वदन्तो *मान्याः*, मान्या एव, इति ध्वनितम् ।

—पृ. १५

यत्तु ''षष्ठी स्थाने' इत्यस्य बाध एव क्लेशः'' इति *मान्याः*; तत् प्राचामनुरोधेन ।

—पृ. १९

अत्र *मान्याः*—प्रत्यासत्त्या विभक्त्याक्षिप्तप्रकृतेः कवर्गवदुत्तरपदाक्षिप्तसमासरूपाया एव ग्रहणादत्र तत्प्रकृतित्वं ङ्यन्तस्य, समासत्वं टजन्तस्य, इति व्याश्रयत्वाण्णत्वस्यैवाप्राप्तिः ।

—पृ. २२

[ तेन अक्षधुरन्तः समासः, शित्, इत्यादिसङ्ग्रहः । आद्ये **कैयटोक्तिस्तु चिन्त्यैव** । अन्त्ये 'ध्वसोरेद्धौ' इति सूत्रस्थं *भाष्यं* गमकम् । ]

एवञ्च, 'अक्षधूः' इत्यादावगत्या तथैव *भाष्या*दिप्रामाण्यात्, इति *मान्योक्तं* प्राचामनुरोधेन, इति बोध्यम् ।

—पृ. २७-२८

*शब्दरत्नम्*

६. **क्लिष्टत्वादिति।** व्यवहितान्वयादिति भावः।

—पृ. २०, पं. १७

७. नन्वेवं 'भगः पदम्' इति कृदन्तस्थं मूलं विरुध्येत, इति वाच्यम्। भगशब्दस्य 'पदम्' इत्यर्थकथनं न तूदाहरणान्तरम्। स्पष्टं चेदम् 'आस्पदं प्रतिष्ठायाम्' इति सूत्रे हरदत्तग्रन्थे।

—पृ. २२, पं. १२-१४

८. यदपि "अकर्तरि' इति सूत्रे 'संज्ञायाम्' इत्युक्तत्वेन घञोऽप्राप्तौ 'ल्युटा बाधात्' इति न युक्तम्" इति। तदपि न। 'अ-संज्ञायाम्' इति पदच्छेदात्। अव्याप्तिः प्रत्याख्यानं चोभयोः समानम्।

—पृ. २२, पं. १८-१९

९. **दुरुपपादत्वादिति।** उपदेशशब्दस्य सकृदुच्चरितत्वात्। अन्यतरव्युत्पत्त्या सर्वत्र निर्वाहाच्च।

—पृ. २५, पं. १८-१९

१०. वस्तुतस्तु सौत्रं पुंस्त्वम्, सौत्रमेकवचनम्, इत्यनयोर्न कश्चिद् विशेषः; इत्याहुः।

—पृ. ३०, पं. १५

११. **अविवक्षितमिति।** अवयुत्यानुवादः, इत्यर्थः। तथा च दीर्घप्लुतयोरप्यर्धोदात्तबोधकम्। अर्धशब्दो न समांशवाची, अपि

*भावप्रकाशस्थमान्यग्रन्थः*

**क्लिष्टत्वादितीति।** यत्तु 'व्यवहितान्वयात्तत्त्वम्' इति *मान्याः*, तत् प्राचामनुरोधेन।

—पृ. ४१

यत्तु "[1]तस्य (भगः) पदम्' इत्यर्थोक्तिः। आदिना स्थानं गृह्यते। तत्फलं तु तस्य केवलयौगिकत्वबोधनम्" इति *मान्याः*; तत् 'आस्पदं प्र' इतिसूत्रस्थहरदत्तानुरोधेन।

—पृ. ४२

एतेन तत्खण्डनाय "अ-संज्ञायाम्' इति छेदः। अव्याप्तिः प्रत्याख्यानं चोभयोस्तुल्ये" इति *मान्योक्तं* प्राचामनुरोधेन, इति ध्वनितम्।

पृ. ४०

एतेन 'उपदेशशब्दस्य सकृदुच्चरितत्वात्, अन्यतरव्युत्पत्त्या सर्वत्र निर्वाहाच्च' इति *मान्योक्तिः* प्राचामनुरोधेन इति ध्वनितम्।

—पृ. ४८

यत्तु 'पुंस्त्वैकवचनयोः सौत्रत्वे न विशेषः' इति *मान्याः*; तत् प्राचामनुरोधेन।

—पृ. ५८

*मान्यास्तु*:—**अविवक्षितमिति।** अवयुत्यानुवादः, इत्यर्थः। एवञ्च दीर्घप्लुतयोरप्यर्धोदात्तबोधकम्। अर्धशब्दो न समांश-

---

१ 'तस्य' इति प्रामादिकम्। तत्स्थाने 'भगः' इत्यपेक्ष्यते।

**शब्दरत्नम्** | **भावप्रकाशस्थमान्यग्रन्थः**

तु लेशवाची। 'विभाषा च्छन्दसि' इत्यनेन विहितानामेकश्रुत्यादीनां तत्तत्प्रातिशाख्यानुरोधेन व्यवस्थावत् कस्याञ्चिच्छाखायां समांशः, कस्याञ्चिच्छाखायामर्धमात्रा; इति व्यवस्थापनीयम्। अत एव 'अर्धग्रहणं व्यर्थम्, समं स्यादश्रुतत्वात्' इति परास्तम्।

—पृ. २३, पं. ७-११

वाची किन्त्ववयववाची। स च क्वचिद्वेदे समांशः, क्वचिद् वेदेऽर्धमात्रा तत्तत्प्रातिशाख्यानुरोधेन इति; लोके सर्वत्र भाष्यप्रामाण्यादर्धमात्रैव, इति च व्यवस्था बोध्या। एवं च 'ह्रस्वग्रहणमतन्त्रम्' इति यथाश्रुतमेव; इत्याहुः। उभयथाऽपि 'समं स्यादश्रुतत्वात्' इत्येव सिद्धे अर्धग्रहणमपि व्यर्थम्, इत्यपास्तम्।

—पृ. ५९-६०

१२. न्यायानङ्गीकारे दूषणमाहः—**अमू इति**। सपादसप्ताध्यायीस्थकार्यदृष्ट्योत्वाभावेऽपि पूर्वं तस्य प्रवृत्तत्वेन 'लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः' इति न्यायेन मकारे विकाराभावेन 'सन्नियोगशिष्ट'न्यायेन दात्परत्वाभावेन च पुनरुत्वाप्रवृत्तावनिष्टं स्पष्टमेव।

—पृ. ४४, पं. ६-९

यत्तु "न्यायनङ्गीकारे दूषणमाहः—**अमू इति**। परत्वान्मुत्वे उत्वमात्रस्यासिद्धत्वादकारबुद्ध्या पररूपे वृद्धावपि पूर्वं प्रवृत्तत्वेन 'लक्ष्ये लक्षणस्य' इति न्यायात् स्थितमस्य विकाराभावेन सन्नियोगशिष्टेतिन्यायाद् दात्परत्वाभावाच्च पुनरुत्वाप्रवृत्त्याऽनिष्टं स्पष्टमेव।" इति *मान्याः*, तत् प्राचामनुरोधेन।

—पृ. ७४

१३. वस्तुतस्तु 'ऋत्यकः' इत्यस्य वैकल्पिकत्वेनाप्रवृत्तावपि अकृतव्यूहपरिभाषया सवर्णदीर्घो न।

—पृ. ४७, पं. १५

अत्र *मान्याः*—"अकृतव्यूहपरिभाषया सवर्णदीर्घो न। अग्रे यण्प्रवृत्त्या सवर्णाज्रूपनिमित्तविनाशात्। एवञ्च तदभावेऽग्रे गुणे यणि च सिद्धं रलाविति" इति।

—पृ. ७८

१४. अत एव 'पूरणगुण' इति समानाधिकरणेन षष्ठीसमासनिषेधोऽपि सङ्गच्छते।

—पृ. ४८, पं. २०

यत्त्वत्र 'पूरणेत्यत्रत्यसमानाधिकरणेन इति ज्ञापकम्' इति *मान्याः*, तत् प्राचामनुरोधेन।

—पृ. ८०

१५. **शीतलशब्दे** इति। शकारस्य ईकारे परतः सवर्णदीर्घो न। शीङ्शपूप्रभृतिषु

यत्तु *मान्याः*—शकारस्येकारादौ परे सवर्णदीर्घादि दधीत्यस्यैव, न शीङ्शयादिषु,

| शब्दरत्नम् | भावप्रकाशस्थमान्यग्रन्थः |
|---|---|
| शकारोच्चारणवैयर्थ्यापत्तेः। अत एव 'डउ'-प्रत्यये सन्धिर्न, इति सिद्धान्तः। —पृ. ४९, पं. १४-१५ | शकारोच्चारणवैयर्थ्यापत्त्या अखण्डेऽच्कार्याप्रवृत्तिबोधनात्। अत एव 'तितउ'शब्देऽपि गुणो न। तस्मात् शीतलशब्दे परे दधीत्यस्य सवर्णदीर्घ आदिशब्दार्थः। अत एव मूलं परममूलं च स्वरसतः सङ्गच्छते, इति; तत् प्राचामनुरोधेन। —पृ. ८२ |
| १६. वर्णग्रहणेऽप्रवृत्तेश्च। अत एव 'पशुषः' इति रूपसिद्धिः। —पृ. ६०, पं. १२-१३ | यत्तु 'आदेच उपदेशे' इत्यत्रोपदेशपदेन वर्णग्रहणे तदप्रवृत्तेर्ज्ञापयिष्यमाणत्वेन मूलमते तत्र तदप्राप्तिरेव, इति 'पशुषः' इत्याद्यसिद्धिपर्यन्तं धावनं व्यर्थम्, इति *मान्यादयः*, (?) तत् प्राचामनुरोधेन। —पृ. ८९ |
| १७. शिश्ये इति। लकारेषु *अष्टाध्याय्यां* लिट एवादौ विधानात् तदुक्तिकालेऽस्य धात्वर्थत्वमस्त्येव। —पृ. ६१, पं. १३-१४ | शिश्ये इतीति। लकारेषु *अष्टाध्याय्यां* लिट एवादौ विधानात् पूर्वोपस्थितत्वरूपान्तरङ्गत्वादिति भावः। —पृ. ९१ |
| १८. द्वितीयान्तसन्निधौ पशुशब्दे पठनीये क्रियासन्निधौ पाठस्यादृष्टार्थतापत्तेश्च।<br>'लोधं नयन्ति पशु मन्यमानाः'<br>इत्यत्र विभक्तिरहिताद्युदात्तत्वसहितपाठेन निपातनिर्णयाच्च। 'निपाता आद्युदात्ताः' इति *फिट्सूत्रात्*, अव्ययाद् विभक्तेर्लुकः सत्त्वाच्च। चतुष्पाज्जातिविशेषवाची पशुशब्दस्त्वन्तोदात्तः, पुँल्लिङ्गश्च;<br>'पशून् ताँश्चक्रे'<br>इत्यादौ तथैव पाठात्। —पृ. ६२, पं. १६-२० | किञ्च द्वितीयान्तसन्निधौ पशुशब्दे पठनीये क्रियासन्निधौ पाठस्यादृष्टार्थतापत्तेः। अपि च<br>'लोधं नयन्ति'<br>इत्यत्र निर्विभक्त्याद्युदात्तपाठेन निपातत्वनिर्णयात्। 'निपाता आद्युदात्ताः' इति *फिट्सूत्रात्*, अव्ययाद् विभक्तेर्लुकः सत्त्वात्। चतुष्पाज्जातिविशेषवाची पशुशब्दस्त्वन्तोदात्तः पुंलिङ्गश्च;<br>'पशूंस्तान्'<br>इत्यादौ तथा पाठात्। —पृ. ९५ |

### शब्दरत्नम्

१९. 'अ अ' इत्याद्युपन्यासस्तु प्रासङ्गिकः। एतेन "'अइउण्' इत्याद्युपन्यासो न युक्तः, एतेषां क्रमविधायकत्वात्। तत्फलं तु 'यमां यमि' इत्यादौ यथासङ्ख्यविज्ञानादिकम्" इत्यपास्तम्। 'राज्ञः क च' 'अलोऽन्त्यस्य' 'लः कर्मणि च भावे च' 'तिप्तस्झि' इत्यादीनामिव 'अइउण्' इत्येषामादिरकारोऽन्त्येन णकारादिना सहितः सत्राद्यन्ताभ्यामाक्षिप्तमध्यगयोरिकारोकारयोरकारस्य च संज्ञा, इत्यर्थस्यैकवाक्यतया निष्पन्नत्वात्, वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वाच्च, इत्यन्यत्र विस्तरः।

—पृ. ६४, पं. १४-१९

२०. तथा च तस्य पदैकवाक्यतयाऽन्वयोऽन्तरङ्गः। 'इको गुणवृद्धी' इति परिभाषाप्रवृत्तौ पदार्थोपस्थितिमात्रं निमित्तं विधीयते, इति मूलग्रन्थस्तु अनुवादे प्राप्त्यभावात् फलितार्थकथनपरतया बोध्यः। अलोऽन्त्यपरिभाषा तु विधिवाक्येष्ववान्तरवाक्यार्थं बुद्ध्वा तदेकवाक्यतया सम्बध्यते, इति तदन्वयो बहिरङ्गः। अवान्तरवाक्यार्थबोधं विना स्थानषष्ठ्या निर्णेतुमशक्यत्वात्।

—पृ. ६७, पं. १४-१८

२१. तच्छेषेति। यद्यपि नियमपक्षो न तच्छेषपक्षः, इति स्फुटमेव, तथापि तच्छेषपक्षदूषणदूषितत्वमस्त्येव।

—पृ. ६६, पं. २१-२२

### भावप्रकाशस्थमान्यग्रन्थः

'अ अ' इत्याद्युपन्यासस्तु प्रासङ्गिकः। एतेन "'अइउण्' इत्याद्युपन्यासो न युक्तः, तेषां क्रमबोधकत्वात्। तत्फलं तु 'यमां यमि' इत्यादौ यथासङ्ख्यधीः" इत्यपास्तम्। उक्तयुक्तेः। 'आदिरन्त्येन' इत्येकवाक्यतया तेषां संज्ञासूत्रत्वाच्च, इत्यन्यत्र विस्तरः।

—पृ. ९६

एतेन "इगुपस्थितौ पदार्थोपस्थितिमात्रं निमितमिति पदैकवाक्यतयाऽन्वयादन्तरङ्गत्वमस्याः। 'विधीयेत' इति त्वनुवादे प्राप्त्यभावात् फलितार्थकथनम्। 'अलोऽन्त्यस्य' इति तु विधिवाक्येष्ववान्तरवाक्यार्थबोधोत्तरं तदेकवाक्यतया सम्बध्यते, इति बहिरङ्गत्वं तस्याः। तं विना स्थानषष्ठ्या निर्णेतुमशक्यत्वात्"-इति *मान्योक्तिः* प्राचामनुरोधेन, इति ध्वनितम्।

—पृ. १००

एतेन 'यद्यपि नियमपक्षो न तच्छेषपक्षः, इति स्फुटमेव, तथापि तच्छेषपक्षदूषणदूषितत्वमस्त्येव' इति *मान्योक्तिर्यथाश्रुतार्थाभिप्राया*, इति ध्वनितम्।

—पृ. १०२

**शब्दरत्नम्** | ***भावप्रकाशस्थमान्यग्रन्थः***

२२. किञ्च, अन्तरङ्गत्वात् नुमः पूर्वं स्वरस्य प्रवृत्तेः।

—पृ. ७०, पं. १३-१४

एतेन 'अन्तरङ्गत्वात् प्राक् स्वरप्रवृत्त्या तत्पक्षेऽपि न दोषः' इति *मान्यो*क्तिः प्राचामनुरोधेन, इति ध्वनितम्।

—पृ. १०७

२३. तत् सर्वम् 'उरण् रपरः' इति सूत्रेण प्रसङ्गावस्थायामेव रपरत्वस्य विधानात्, 'सोष्मणः' इति *भाष्येण* गुणकृतान्तर्यस्य, 'ऐचोश्चोत्तरभूयस्त्वात्' इति *भाष्येण* स्थानकृतान्तर्यस्य चोपपादितत्वाच्च, उपेक्ष्यम्।

—पृ. ७२, पं. ५-६

"प्रसङ्गावस्थायामेव रपरत्वविधानात्, 'सोष्मणः' इत्यनेन गुणकृतान्तर्यस्य, 'ऐचोश्चोत्तरभूयस्त्वात्' इत्यनेन स्थानकृतान्तर्यस्य च विवक्षितत्वाच्च" इति *मान्योक्तिः* प्राचामनुरोधेन, इति बोध्यम्।

—पृ. १०९

२४. आदेशस्य प्रत्ययाधिकारे पाठेऽपि षष्ठीनिर्देशात् स्थानिसम्बन्धलाभेन निराकाङ्क्षत्वेन 'परश्च' इत्यस्यानुपस्थितौ तत्सहचरितत्वात्, संज्ञानपेक्षणाच्च 'प्रत्ययः' इत्यस्याप्यनुपस्थितौ औपदेशिकप्रत्ययत्वाभावः।

—पृ. ८०, पं. ९-१०

*मान्यास्तु*—"तत्त्वेऽपि षष्ठीबलात्, उद्देशांशे नैराकाङ्क्ष्यात्, 'परश्च' इत्यस्यानुपस्थित्या तत्सहचरितस्य 'प्रत्ययः' इत्यस्याप्यनुपस्थितेस्तदुपयोगः" इत्याहुः; तत्प्राचामनुरोधेन।

—पृ. ११७

२५. तस्मात् 'अन्तरङ्गबहिरङ्गयोरन्तरङ्गम्' इति परिभाषान्तरमभ्युपगन्तव्यम्। अत्र च ज्ञापकम् 'ओमाङोश्च' इत्याङ्ग्रहणम्। तद्धि 'खट्वा आ ऊढा' इत्यत्र परमपि सवर्णदीर्घं बाधित्वा 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यन्तरङ्गत्वात् गुणे कृते वृद्धिप्राप्तौ सत्यां पररूपं यथा स्यात्, इति क्रियते। स्पष्टं चेदं 'सम्प्रसारणाच्च' इति सूत्रे *भाष्ये*।

न चेयं परिभाषा विप्रतिषेधसूत्रे *भाष्ये* प्रत्याख्याता, इति वाच्यम्। लौकिकन्यायसिद्धायाः प्रत्याख्यातुमशक्यत्वात्। 'नाजा-

युक्तं चैतत्। 'अन्यथा तस्य 'नाजानन्तर्ये' इति निषिद्धतया 'अयजे इन्द्रम्' इत्याद्यसिद्धयापत्तेः। न चेयं विप्रतिषेधसूत्रे *भाष्ये* प्रत्याख्याता, इति वाच्यम्। लोकन्यायसिद्धायाः प्रत्याख्यातुमशक्यत्वात्। 'नाजानन्तर्ये' इति न्यायबोधक*भाष्य*विरोधेन *तद्भाष्य*स्यैकदेश्युक्तित्वाच्च।

अत्र ज्ञापकमपि 'ओमाङोश्च' इत्याङ्ग्रहणम्। तद्धि 'खट्वा आ ऊढः' इत्यादौ परमपि सवर्णदीर्घं बाधित्वा धातूपसर्गकार्यत्वेनान्तरङ्गत्वाद् गुणे कृते वृद्धिप्राप्तौ पररूपं

## शब्दरत्नम्

नन्तर्ये' इति न्यायबोधक*भाष्य*विरोधेन तद्*भाष्यस्य* प्रौढिवादपरत्वाच्च ।

—पृ. ८२, पं. १५-२१

२६. एवं च 'अनियमे नियमकारिणी परिभाषा' इति युक्तिसिद्धार्थस्य *भाष्या*दावुक्तत्वात्' 'आकाङ्क्षितविधानं ज्यायः' इति न्यायाच्च 'यथासङ्ख्य' सूत्रप्रवृत्तिबोधक*भाष्या*दिग्रन्था अयुक्ता एव, इति ध्येयम् ।

—पृ. ८८, पं. १६-१८

२७. किञ्च *आचार्य*ग्रहणस्य पूजार्थकत्वे 'भ्राष्ट्रम्' इत्यादौ विकल्पार्थं 'त्रिप्रभृतिषु' इति सूत्रस्यावश्यकत्वेन 'भ्राष्ट्रम्' इत्युदाहरणपरवृत्तिग्रन्थस्य यथाश्रुतत्वेनैवोपपत्तौ 'दीर्घादाचार्याणाम्' इत्यस्यासिद्धत्वात् 'त्रिप्रभृतिषु' अयमेव प्रतिषेधो भवति, इति मन्यते, इति *मिश्रोक्तं* भङ्क्त्वा व्याख्यानं विरुध्येत, इत्यास्तां तावत् ।

—पृ. ९१-९२

२८. *माधवा*दिविरोधेन *वृत्त्या*दिग्रन्थानां त्यक्तुं शक्यत्वाच्च ।

—पृ. ९१, पं. ४

२९. **दिगिति** । दिगर्थस्तु वाक्, वाक्क्, इति *भाष्यो*दाहरणविरोधः । न चोक्तरीत्या निर्वाहः । मण्डूकानुवृत्त्यादेरप्रामाणिकत्वात् ।

—पृ. ९२, पं. ७-८

## भावप्रकाशस्थमान्यग्रन्थः

यथा स्यात्, इति क्रियते इति स्पष्टं 'सम्प्रसारणाच्च' इति सूत्र*भाष्ये* ।

—पृ. ११९

एतेन लक्ष्यसिद्ध्यर्थमावश्यकेन 'स्थानेऽन्तर' इत्यनेनैव निर्वाहे 'अनियमे नियमकारिणी' इति *भाष्या*दावुक्तत्वात्, आकाङ्क्षितविधानस्य ज्यायस्त्वाच्च, यथासङ्ख्यसूत्रप्रवृत्तिबोधक*भाष्या*दिग्रन्था अयुक्ता एव, इति *मान्यो*क्तिः प्राचामनुरोधेन, इति ध्वनितम् ।

—पृ. १३७-१३८

तदर्थस्तु उक्ताशयेन *आचार्य*ग्रहणस्य पूजार्थत्वे भाष्ट्रमित्यादौ वार्थं 'त्रिप्र' इत्यस्यावश्यकतया तस्य तल्लक्ष्यत्वपरवृत्तिग्रन्थस्य यथाश्रुतत्वेनैवोपपत्तौ 'दीर्घात्' इत्यस्यासिद्धत्वात् 'त्रिप्रभृतिषु' अयमेव प्रतिषेधो भवतीति मन्यते, इति भङ्क्त्वा व्याख्यानं *मिश्रोक्तं* विरुध्येत ।

—पृ. १४२

किञ्च *माधवा*दिविरोधेन *वृत्त्या*दीनामसङ्ग्राह्यत्वम् ।

—पृ. १४२

किञ्च वाक्क्, वाक्, इति *भाष्यो*दाहरणविरोधः । न चोक्तरीत्या निर्वाहः । मण्डूकानुवृत्त्यादेरप्रामाणिकत्वात् ।

—पृ. १४२

| शब्दरत्नम् | भावप्रकाशस्थमान्यग्रन्थः |
|---|---|
| ३०. आदिना त्वीटो ग्रहणम् । —पृ. ९३, पं. ३ | एतेन 'आदिना त्वीटो ग्रहणम्' इति *मान्योक्तिः* प्राचामनुरोधेन, इति सूचितम् । —पृ. १४३ |
| ३१. न चाधिकारात् तत्सिद्धिः । उक्तोत्तरत्वात् । —पृ. ९२, पं. २० | एतेन 'न चाधिकारात्तत्सिद्धिः । उक्तोत्तरत्वात्' इति *मान्योक्तिः* प्राचामनुरोधेन, इति ध्वनितम् । —पृ. १४४ |
| ३२. अव्ययस्येति । न च "न लुमताऽङ्गस्य' इति निषेधेनाङ्गत्वं दुर्लभम्" इति वाच्यम् । अङ्गसंज्ञाया अङ्गनिमित्तकार्यत्वाभावेन निषेधाप्रवृत्तेः । अत एव 'पञ्चभिः क्रोष्टीभिः क्रीतं कुलम्' 'तद्धितार्थ' इति समासे, ठकः 'अध्यर्धपूर्व' इति लुकि, 'लुक् तद्धितलुकि' इति स्त्रीप्रत्ययलुकि, स्वमोर्लुकि, 'क्रोष्टृ' इति प्रयोगसिद्धिः । स्पष्टं चेदं 'युवोरनाकौ' 'तृज्वत् क्रोष्टुः' 'स्त्रियां च' इति सूत्रे *भाष्यकैयटपदमञ्जर्यादौ* । —पृ. ९३, पं. १०-१५ | यत्तु *मान्याः*, न च 'न लुमता' इति निषेधेनाङ्गसंज्ञा तस्य दुर्लभेति वाच्यम्, तस्या अङ्गनिमित्तकार्यत्वाभावेन निषेधाप्राप्तेः । अत एव पञ्चभिः क्रोष्टीभिः क्रीतं कुलम्, इति तद्धितार्थे समासे, ठकः 'अध्यर्ध' इति लुकि, 'लुक् तद्धित' इति ङीपो लुकि सोर्लुकि च तृज्वत्त्वयुक्त'पञ्चक्रोष्टृ' इति प्रयोगसिद्धिः । ... ... ... ... स्पष्टं चेदं 'युवोरनाकौ' 'तृज्वत्क्रोष्टुः' इत्यादिसूत्रेषु *भाष्यकैयटपदमञ्जर्यादौ*, इत्याहुः । —पृ. १४७ |
| ३३. नन्वयं सिद्धान्तः, उपस्थितसामान्यधर्मैस्तदाक्षिप्तव्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति, अनुपस्थितस्य विशेषस्य ग्रहणे प्रमाणाभावः, इति तर्कमूलकः । 'स्थानिवदादेशः' इत्यत्र तु स्थानित्वधर्मोपस्थितिः । न च तन्निमित्तकार्यमस्ति । तथा च अतिदेशसामर्थ्यात् अन्येषां ग्रहणे विनिगमकाभावात् सर्वेषां ग्रहणम् इति दृष्टान्तदार्ष्टान्तिकयोर्महद् वैषम्यम् । —पृ. ९६-९७ | अत्र *मान्यादयः*—उक्तन्यायस्योपस्थितसामान्यधर्मैस्तदाक्षिप्तव्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति तदन्यग्रहणे मानाभावः, इति तर्कमूलकतया दृष्टान्ते तथा सम्भवेऽपि अत्र स्थानित्वधर्मोपस्थित्या तन्निमित्तकार्याभावेनातिदेशसामर्थ्यादन्येषां ग्रहणावश्यकत्वे विनिगमकाभावात्सर्वेषां ग्रहणम्, इति तयोर्महद्वैषम्यम्, इति समादधुः, तद् प्राचामनुरोधेन । —पृ. १५२ |

### शब्दरत्नम्

३४. यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तौ अतिदेशप्रवृत्तिर्मृग्यते, तन्निमित्तं शास्त्रीयमेव गृह्यते । कार्यमपि तथैव ।

—पृ. ९६, पं. ७, ८, ९

३५. नन्वेवमपि वत्वस्य हल्त्वाद्यपेक्षया विशेषधर्मत्वेन अतिदेशाप्राप्तिः । सामान्यातिदेशे विशेषानतिदेशः, इति सिद्धान्तात् । अत एव 'ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्' इत्युक्ते माठारादिविशेषकार्यं नातिदिश्यते ।

—पृ. ९६, पं. १६, १७, १८

३६. यद्यपि *वार्तिककृन्मते*, अप्राधान्येनालाश्रयणे प्रत्ययलक्षणार्थं प्रत्ययलक्षणसूत्रम्; तथापि *भाष्यकृन्मते* प्रत्ययलक्षणसूत्रं नियमार्थम्; इत्यभिप्रायेणोक्तम् ।

—पृ. ११९, पं. १५-१६

३७. न च ईदृशे विषये सवर्णग्रहणेन सिद्धत्वाभावोऽनुमीयते, इति वाच्यम्; फलाभावात् ।

—पृ. १२६, पं. १२

३८. Cf. —पृ. १२५, १२६

३९. 'यण:प्रतिषेधः' इति वार्तिके यणपदम् अझल्परम् । झल्ग्रहणापकर्षेण प्रत्याख्यानात् । एवं च पक्षत्रयेऽपि संयोगान्तलोपो न । अयं चार्थः 'मान्तमेव' इत्येवकारेण सूचितः । 'गिरिवेट्' इत्युचितम्, इति तु परसन्तोष-

### भावप्रकाशस्थमान्यग्रन्थः

ननु "यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशप्रवृत्तिस्तस्य कार्यवच्छास्त्रीयस्यैव प्रत्यासत्त्या ग्रहणेन वत्वस्य 'स्वं रूपम्' इत्यनेन तत्त्वेऽपि हल्त्वाद्यपेक्षया विशेषधर्मत्वेन 'सामान्यातिदेशे' इति न्यायेनानतिदेशात्तस्य लोपाप्राप्तिः" इति मूलमयुक्तम् । अत एव 'ब्राह्मणवत्' इत्यनेन ब्राह्मण्यप्रयुक्ताग्रासनादीन्यतिदिश्यन्ते, न माठरत्वादिविशेषकार्याणि ।

—पृ. १५१

एतेन '*वार्तिक*मते यद्यप्युत्तराविषयतया तत्प्राप्तिरेव, तथापि *भाष्या*भिप्रायेणेत्युक्तम्' इति *मान्यो*क्तिः प्राचामनुरोधेनेति ध्वनितम् ।

—पृ. १६५

अत्र *मान्यो*क्त्या तावत्समाधत्ते **फलाभावादिति** । यस्मिन् ज्ञापिते यस्य स्वस्मिन् चरितार्थ्यमन्यत्र फलं तत्तेन ज्ञाप्यम्, इति सिद्धान्तेनान्यत्र फलाभावादित्यर्थः ।

—पृ. १७१

इति *मान्य*मतनिष्कर्षः ।

—पृ. १७१

यत्तु *मान्याः*— "झलपकर्षणप्रत्याख्यानानुरोधेन वार्तिके यणूपदमझल्परम् । एवञ्च पक्षत्रये संयोगान्तलोपो न । एवेन सूचितोऽयमर्थः । 'गिरिवेट्' इत्युचितम्, इति तु परसन्तोषमात्रम् । उत्तरग्रन्थस्य तदुपमर्द-

शब्दरत्नम्

मात्रम्। उत्तरग्रन्थस्य तदुपमर्दनार्थमेव प्रवृत्तत्वात्।

—पृ. १३५, पं. १३-१६

४०. Cf. झल्ग्रहणापकर्षपक्षफलैक्यार्थं ‘पूर्वं पूर्वमन्तरङ्गम्’ इत्याद्यर्थस्याप्याश्रयणेन, चरमपक्षेऽपि मान्तप्रयोगस्य सत्त्वेन, अनेकपक्षानुगुण्यस्यात्राविशिष्टत्वात्। क्लृप्ता चेयं व्यवस्था आद्ययोः पक्षयोः फलैक्ये। एतेन चरमपक्षस्य प्राबल्यानुमानात् अमान्तमेवोचितमित्यपास्तम्। हेत्वनुपन्यासाच्च। न च चरमग्रन्थोपन्यासो हेतुः। अप्रयोजकत्वात्। मानान्तरेण सिद्धप्राबल्यकस्य उत्सर्गतश्चरमग्रन्थे उपन्यासः। न चैवं ‘यणि प्रतिषेधारम्भ’पक्षापेक्षया झल्ग्रहणापकर्षपक्षस्य प्राबल्यं न स्यात्, इति वाच्यम्। लाघवेन *त्रिमुनि*सम्मतत्वेन च तत्सिद्धेः।

—पृ. १३२, पं. ८-१६

४१. ‘इरयोः’ इति द्विवचनं तु लाक्षणिकस्यापि रेभावार्थम्।

—पृ. १४५, पं. ८-९

४२. सम्प्रसारणशब्दवाच्यो हि द्विविधः शास्त्रे। एकः सम्प्रसारणशब्देनोत्पन्नः, यथाः—‘ध्यायतेः सम्प्रसारणं च’ इति। द्वितीयः, पूर्वरूपादिसंशब्दनेनोत्पन्नः। आद्यस्यौपदेशिकं सम्प्रसारणत्वम्। द्वितीयस्यातिदेशिकम्।

—पृ. १५१, पं. ६-८

भावप्रकाशस्थमान्यग्रन्थः

नार्थमेव प्रवृत्तत्वात्। एवञ्चापकर्षो मुख्यपक्षः, तदनुरोधेनाद्यान्त्ययोर्व्यवस्था। न त्वन्त्यानुरोधेन पूर्वयोर्व्यवस्था। अन्तरङ्गत्वादीनामनेकत्वात्।

“एतेन चरमोक्तत्वाच्चरमपक्षस्यैव प्राबल्यमित्यपास्तम्। मानान्तरसिद्धप्राबल्यकस्यैव प्रायश्चरमोपन्यासः। लाघवेन *त्रिमुनि*सम्मत्या च अत्र मध्यपक्षस्य प्राबल्यसिद्धिः। यथा यथा सूत्रेष्टत्वं तथोक्तं प्राक्। एवञ्चानेकपक्षानुरोधान्मान्तमेव।

“एतेनोक्तयुक्त्या ‘डान्तमेवोचितम्’ ‘बह्वपेक्षं बहिरङ्गम्’ इति रीत्या मलोपसौलभ्यात्, इत्यपास्तम्। युक्तितौल्यात्। मध्यपक्षस्योक्तरीत्या प्राबल्येन तदैक्याय पूर्वम्पूर्वमित्याश्रयणाच्च। अत एव ‘न वा झलः’ इत्यत्र पूर्ववचनाभावबोधकनुल्लेखो नोत्तरत्र।”

इत्याहुः। तत् प्राचामनुरोधेन।

—पृ. १८४

‘लाक्षणिकत्वात्सागमेन स्यात्, अतो द्विवचनमुपक्षीणमित्यज्ञापकम्’ इति *मान्याः*।

—पृ. १९५

न च, ‘उपदेशातिदेशाभ्यां सम्प्रसारणद्वैविध्यलाभेन पूर्वरूपनिष्पन्नातिदेशिकसम्प्रसारणत्ववत एवात्र सम्प्रसारणपदेन ग्रहणेन तत्स्थानिकदीर्घस्यातथात्वम्, इति *मान्योक्त*रीत्या यथाश्रुतमूलसामञ्जस्यम्’ इति वाच्यम्।

—पृ. २०१

शब्दरत्नम्

४३. **कैयट** इति । तस्यायमाशयः । व्यक्तिपक्षे हि प्रतिलक्ष्यमसकृत् लक्षणं प्रवर्तते । यद्वा प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तन्त्रेणोच्चारणम्, 'इको यणचि' इति । ततश्चैकामपि तात्पर्यतो निमित्तत्वप्रतिपादनाददोषः । न चैवं 'श्रीशः' इत्यादावपि यण्-प्रसङ्गः । व्यक्तिपक्षे 'विप्रतिषेधे परमेव' इति नियमबलेन तद्व्यक्तिविषयकशास्त्रस्यैव विरहकल्पनात् । एवमपवादविषयेऽपि । 'परिहृत्य चापवादविषयं तत उत्सर्गोऽभिनिविशते' इति न्यायात् । जातिव्यक्तिपक्षौ च लक्ष्यानुरोधेन व्यवस्थितौ, इति ।

—पृ. १५३, पं. १६-२१

४४. स्वोपन्यस्त—'ऋत इद्धातोः'- इति-सूत्रस्थधातोरिति प्रमाणस्य त्यागे बीजाभावेन *भाष्यस्य* प्रौढिवादपरत्वात् ।

—पृ. १५४, पं. ९-१०

४५. वाक्यसंस्कारपक्षे 'कृष्ण ऋध् तिः' इत्यस्यामवस्थायाम् 'झषस्तथोर्धोऽधः' इत्यस्यासिद्धत्वेन गुणेन ऋकारनाशेन द्वित्वाप्रवृत्तौ च गुण एव । तस्मिंश्च सति द्वित्वे कर्तव्येऽसिद्धत्वं न; इत्यर्थस्य सत्त्वेन, 'पूर्वत्रासिद्धमद्वित्वे' इति न्यायेन परत्वाद् वक्ष्यमाणरीत्या 'आगन्तूनामन्ते निवेशः' इति न्यायेन द्विर्वचनविधिविधेयस्य उत्तरत्रैवोत्पत्तेर्झषानन्तर्यस्य विघातेन अकृतव्यूहपरिभाषया धत्वाप्रवृत्तौ जश्त्वाप्रवृत्तेश्च द्विर्वचने सति, 'धस्य' इत्युक्तिः सम्यगेव ।

—पृ. १५९, पं. १४-१९

*भावप्रकाशस्थमान्यग्रन्थः*

यत्तु *मान्याः*— व्यक्तिपक्षाङ्गीकाराशयकोऽयं *कैयटः* । तत्र हि प्रतिलक्ष्यमसकृल्लक्षणप्रवृत्तिः । यद्वा प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तन्त्रेणोच्चारणम् 'इको यणचि' इति । ततश्चैकामपि तात्पर्यतो निमित्तत्वबोधनाददोषः । 'श्रीशः' इत्यादौ यण् तु न । तत्र पक्षे 'विरोधे परमेव' इति नियमबलेन तद्विषयकपूर्वशास्त्राभावकल्पनात् । एवमपवादविषयेऽपि 'परिहृत्य वे( चे )ति' न्यायात् । जातिव्यक्तिपक्षौ च लक्ष्यानुरोधेन व्यवस्थितौ'' इति, तत् प्राचामनुरोधेन ।

—पृ. २०५

'लाकृतिः' इति सत्त्वे तु अत्र ल्द्वयश्रवणापत्त्या सामर्थ्यवर्णनासङ्गतिः । *भाष्यस्य* प्रौढिवादत्वम्, इति *मान्योक्तिस्तु* प्राचामनुसारेण, इति भावः ।

—पृ. २१०

एतेन ''वाक्यसंस्कारपक्षे 'कृष्ण ऋध् तिः' इत्यत्र धत्वासिद्धया गुणेन भावि-'ऋ'-नाशेन द्वित्वाप्राप्त्या च गुणे, द्वित्वे कार्येऽसिद्धत्वं नेत्यर्थतात्पर्यकपूर्वत्रासिद्धमित्यनेन परत्वाद्वक्ष्यमाणरीत्या 'आगन्तूनामन्ते निवेशः' इति न्यायेन द्वित्वशास्त्रविधेयस्याग्रे एवोत्पत्त्या झषानन्तर्यविघातेन 'अकृत'इत्यनेन धत्वाप्राप्त्या जश्त्वाप्रवृत्तेश्च द्वित्वे सति धस्येत्युक्तिरुचितैव'' इति *मान्योक्तिः* प्राचामनुरोधेन, इति ध्वनितम् ।

—पृ. २१३

| शब्दरत्नम् | भावप्रकाशस्थमान्यग्रन्थः |
|---|---|
| ४६. पूर्वत्रानुपन्यासे पक्षान्तरोपन्यासव्याजेन बीजमाहः— **अत्र चेति** । —पृ. १७४, पं. १० | एतेन 'पूर्वत्रानुपन्यासे पक्षान्तरोपन्यासव्याजेन बीजमाहः—**अत्र चेति**' इति *मान्योक्तं* व्याख्यानं प्राचामनुरोधेन, इति ध्वनितम् । —पृ. २२८ |
| ४७. यत्तु 'वृत्तौ भवं वार्त्तिकम्' इत्याहुः, तन्न । *भाष्यपदस्य* अनन्वयापत्तेः । वार्त्तिकशब्दस्य यौगिकत्वेन पूर्वनिपातापत्तेश्च । —पृ. १७८, पं. १६-१७ | [ 'वृत्तौ भवम्' इति व्याख्याने वार्त्तिकशब्दस्य पूर्वनिपातापत्तिः, इत्याहुः । ] *—लघुशब्दरत्नम्* **आहुरिति** । मूलानुयायिनो *मान्याः*, इत्यर्थः । तस्य यौगिकत्वादिति भावः । —पृ. २३३ |
| ४८. प्रश्ने तत्त्वं तु सिद्धान्तदूषणातिरिक्तदूषणवत्त्वम् । तच्च तदन्त्ये प्रवृत्त्या स्पष्टमेव । —पृ. १८०, पं. ७-८ | एतेन प्रश्ने तत्त्वं सिद्धान्तदोषान्यदोषवत्त्वम् । —पृ. २३५ तच्च अन्त्ये प्रवृत्त्या स्पष्टमेव । —पृ. २३५ |
| ४९. उत्तरे तत्त्वं तु उत्तरान्तरसहितत्वम् । —पृ. १८०, पं. १६ | उत्तरे तत्त्वं तु उत्तरान्तरसहितत्वम् । —पृ. २३६ |
| ५०. ननु 'अत्'ग्रहणसामर्थ्यात् जश्त्वाविषये अनुकार्यानुकरणयोरभेदविवक्षायामेवास्य प्रवृत्तिः, इति चेत्, न । 'पट्' इत्येकदेशानुकरणेनेष्टसिद्धौ रूपान्तरस्य त्वदुक्तरीत्या सूत्रारम्भेऽपि दुर्वारत्वात् सूत्रवैयर्थ्यापत्तेः । अपदान्ताधिकारेणैव सिद्धौ 'अत्'ग्रहणस्य वैयर्थ्यानुद्धाराच्च । —पृ. १८१, पं. १०-१३ | [एतेन 'पुनरद्ग्रहणं श्रौततान्तत्वविवक्षाद्वारा जश्त्वाविषये अभेदविवक्षायामेव यथा स्यात्, न तु भेदविवक्षायां जश्त्वविषये, इत्यर्थकम्' इत्यपास्तम् । ममाद्ग्रहणं तु शब्दाधिकारानित्यत्वज्ञापनार्थम्, इति दिक् । ] *—लघुशब्दरत्नम्* तदेव ध्वनयन्नाहः—'जश्त्वेति' इति *मान्या* व्याचख्युः, तत् प्राचामनुरोधेन । —पृ. २३७ |

शब्दरत्नम्

५१. एतेन 'उत्तरार्थे षष्ठीनिर्देशस्य सत्त्वेन अत्र प्रथमया विपरिणामः' इति परास्तम्। प्रथमान्तस्य उत्तरत्र षष्ठ्या विपरिणामस्य युक्तत्वात्, इत्याशयेनाह:— **प्रतिपदोक्तेति**। एङ्ग्रहणानुवृत्तिसामर्थ्यात्, अन्तग्रहणानुवृत्तिसामर्थ्याद् वा प्रतिपदोक्त एङ् गृह्यते, इति भावः।

—पृ. १८८, पं. ५-९

५२. यद्यपि क्वचिद् *भाष्य*पुस्तके 'इन्द्रे' इति सप्तम्यन्तमेव पठ्यते, तथापि तत् सूत्रैकदेशानुकरणपरतयैव व्याख्येयम्।

—पृ. १९१, पं. १२-१३

५३. 'प्राचाम्' इति न प्रकरणशेषभूतम्। किन्तु 'प्रत्यभिवादे' इत्यारभ्य 'गुरोरनृतः' इत्यन्तानामेव। तस्यैवोपस्थितत्वात्। अत एव 'अत्र'करणं चरितार्थम्। अत एव च 'विभाषा पृष्टप्रतिवचने' इति सूत्रे विभाषाग्रहणं चरितार्थम्। ध्वनितश्चायमर्थः "अपर आह' इत्युक्त्या अरुचिबोधनेन *भाष्यकारेण*" इत्याहुः।

—पृ. १९५, पं. १५-१९

५४. तच्च सम्बोधनं 'सम्बोधने च' इति शास्त्रव्युत्पादितमेव।

—पृ. १९२, पं. २

५५. 'वं प्रचेतसि जानीयात्, इवार्थे च तदव्ययम्' इति *मेदिनीव्याख्यावसरे* सत्यभामा, भामा, इतिवत् इवार्थे 'व'शब्दप्रयोगः, इत्याहुः।

—पृ. २०१, पं. ११-१२

*भावप्रकाशस्थमान्यग्रन्थः*

एतेन 'उत्तरार्थं षष्ठीनिर्देशसत्त्वेन अत्र प्रथमया विपरिणामः, इत्यपास्तम्। प्रथमान्तस्य उत्तरत्र षष्ठ्या विपरिणामस्य युक्तत्वात्। एवञ्च एङ्ग्रहणानुवृत्तिसामर्थ्यात्, अन्तपदानुवृत्तिसामर्थ्यात्, औपदेशिकान्तलाभद्वारा वा तल्लाभः' इति *मान्योक्तिः* प्राचामनुरोधेन, इति ध्वनितम्।

—पृ. २३९

'*भाष्ये* तथा पाठः सूत्रैकदेशानुवादी' इति *मान्योक्तिस्तु प्रक्रियाप्रकाशानुयायिनी*।

—पृ. २४५

अत्र *मान्यादयः*—प्राचामिति विभक्तम्, 'प्रत्यभिवादे' इत्यारभ्य 'दूराद्धूते' इत्यारभ्य वा 'गुरोरनृतः' इत्यन्तेन वा सम्बध्यते। उपस्थितत्वात्, 'अत्र'करणाच्च, 'भोराजन्य' इत्यत्र वापदानर्थक्यापत्तेश्च, 'विभाषा पृष्ट' इत्यत्र तदुक्तेश्च। ध्वनितश्चायमर्थः, 'अपर आह' इत्युक्त्या अरुचिबोधनेन *भाष्यकारेण*; इति, तत्प्राचामनुरोधेन।

—पृ. २४६

एतेन "तच्च सम्बोधनम् 'सम्बोधने च' इति शास्त्रव्युत्पादितमेव" इति *मान्योक्तिः* प्राचामनुरोधिनी।

—पृ. २४७

'वं प्रचेतसि' इति *मेदिनीव्याख्यावसरे* 'सत्या भामा' इत्यादिवत् इवार्थे वशब्दप्रयोगः, इति व्याख्यातम्, इति *मान्योक्तिस्तदनुरोधेनैव*।

—पृ. २४८-२४९

शब्दरत्नम्

भावप्रकाशस्थमान्यग्रन्थः

५६. 'आकडारात्' इत्यस्य तु न प्रवृत्तिः। संज्ञाया एकत्वात्।

—पृ. २११, पं. ५

[संज्ञाया एकत्वात्, ज्ञापकस्य च विशेषापेक्षत्वेन संज्ञाभेदविषयत्वात्, इति भावः, इति केचित्।] —लघुशब्दरत्नम्

**केचिदिति**। मूलानुयायिनो *मान्याः*, इत्यर्थः।

—पृ. २५३

५७. 'चयो द्वितीयाः' इत्यस्य *भाष्ये* 'नादिन्याक्रोशे पुत्रस्य' इत्यत्र पठितत्वेन तत्वस्यासिद्धत्वात्, इति भावः।

—पृ. २१९, पं. २०-२१

अत एव "'चयो द्वितीयाः' इत्यस्य *भाष्ये* 'नादिनी' इत्यत्र पाठेन तत्वस्यासिद्धत्वात्" इति तत्र *मान्यानां* हेतूक्तिः सङ्गच्छते।

—पृ. २६२

५८. वस्तुतस्तु 'वाऽवसाने' इति चर्त्वस्यासिद्धत्वात् पूर्वं जश्त्वोपन्यास एव युक्तः। न च चर्त्वस्य वैयर्थ्यम्। जश्त्वे कृते तस्य सावकाशत्वात्।

—पृ. २२०, पं. १९-२०

अत एव *मान्याः*—
वस्तुतस्तु चर्त्वासिद्ध्या जश्त्वोपन्यास एव प्राक् युक्तः। चर्त्ववैयर्थ्यं तूक्तरीत्या न, इति व्याख्यातम्।.... ....

—पृ. २६४

५९. 'चयो द्वितीयाः' इत्यस्य प्रतिशाख्यानुरोधेन वेदे अपदान्ते एव प्रवृत्तिः, इति हलन्ते स्फुटम्। एवं च वेदलोकयोरैक्यार्थं लोकेऽपि व्यवस्थितविभाषया पदान्ते द्वितीयादेशो न, इति वादिनां मतेन इदम्।

—पृ. २२३, पं. १६-१८

अत्र *मान्याः*—
"'चयो द्वितीयाः' इत्यस्य *प्रातिशाख्या*नुरोधेन वेदे अपदान्ते एव प्रवृत्तिः, इति हलन्ते स्फुटम्। एवं च लोकवेदयोरैक्यार्थं लोकेऽपि व्यवस्थितविभाषया पदान्ते द्वितीयादेशो न, इति वादिनां मतेनेदम्।

—पृ. २६८

६०. 'हरिं जयति' इत्यादौ 'झलां जश् झशि' इति जश्त्वं तु न। स्थानप्रयत्नाभ्याम-न्तरतमेऽन्यत्र चरितार्थत्वात्।

—पृ. २३६, पं. १६-१७

'स्थानप्रयत्नाभ्याम्' इत्यादि *मान्यरत्नाकरा*युक्तिस्तु न युक्ता, इति भावः।

—पृ. २८१

शब्दरत्नम्

६१. क्लेश इति। समस्तैकदेशानुवृत्तिः, सन्निहितत्यागश्च क्लेशान्तरे बोध्ये।

—पृ. २४५, पं. १७

६२. 'उरःकेण' इत्यादौ 'धनक्रीता' इत्यादाविव उक्तवचनस्यानित्यत्वेन सुबन्तेन समासे सत्वाभावो बोध्यः।

—पृ. २४६ पं. ११-१२-१३

६३. 'न मु ने' इत्यत्र 'न' इति योगविभागेन स्थलत्रये असिद्धत्वाभावबोधनात् न्यायसिद्धम्। अत एव सिद्धकाण्डसङ्ग्रहः।

—पृ. २५०, पं. १९-२०

६४. 'तिरसोऽन्यातरस्याम्' इति सूत्रे 'अन्यतरस्याम्' इत्यस्य यथाश्रुतार्थत्वेन 'इदुदुपधस्य' इत्यत्र व्यवस्थितविभाषापरत्वेन ....

—पृ. २५३, पं. ९-१०

६५. यद् वा इदुपधसाहचर्येण उदुपधोऽपि अपञ्चमीषष्ठीतिङन्ततद्धितावयवो गृह्यते। उदुपधसाहचर्येण इदुपधः अतृतीयावयवो गृह्यते। —पृ. २५४, पं. ७-८

६६. 'इष्टादिभ्यश्च' इति सूत्रे 'अनिष्टी' इति प्रयोगसाधनार्थं 'पूर्वादिनिः' 'सपूर्वाच्च' इति योगविभागस्य चारितार्थ्येन ज्ञापकमपि दुर्निरूपम्।

पृ. २५८, पं. २०-२१

*भावप्रकाशस्थमान्यग्रन्थः*

सुतरामिति। तथाऽनुवृत्तिरेव एकः क्लेशः। समस्तैकदेशानुवृत्तिः, सन्निहितत्यागश्च क्लेशान्तरे; एवं व्याख्यानमधिकः क्लेशः, इत्यर्थः।

—पृ. २९०

'उरःकेण' इत्यादौ तु 'धनक्रीता' इतिवत् समासेन निर्वाहः, इति *मान्योक्तिः* प्राचामनुरोधेन, इति सूचितम्।

—पृ. २९१

योगविभागस्तु *भाष्ये* न दृश्यते। अत एव सिद्धकाण्डं *वार्तिककृता* आरब्धम्; 'न लोपः' इति सूत्रं च *सूत्रकृता*। *मान्योक्तिस्तु कौस्तुभानुसारिणी*।

—पृ. २९८

एतेन 'इदुदुपधौ मिथः साहचर्यात् तृतीया—पञ्चमी—षष्ठी—तद्धित—तिङन्तावयवभिन्नौ गृह्येते। यद्वा, 'अन्यतरस्याम्'ग्रहणापकर्षेण व्यवस्थितविभाषया नातिप्रसङ्गः, इति *मान्योक्तिः*, तदनुरोधिनी इति ध्वनितम्।

—पृ. २९६

[न च 'इष्टादिभ्यः' इत्यत्र अनुवृत्त्यर्थं तथा पाठः; अत एव 'अनिष्टी' इत्यादिसिद्धिः, इति वाच्यम्। ज्ञापकपरभाष्यप्रामाण्येन 'अनिष्टी' इत्यादिप्रयोगाणामनिष्टत्वात्।]

—लशर ३०६-३०७

मान्योक्तं दोषमुद्धरतिः—न चेति।

पृ. १८७

### शब्दरत्नम्

६७. अत्र अरुचिबीजं तु 'पारमगोपुच्छिकम्' 'गौपुच्छिकम्' इत्यादाविष्टप्रत्ययानापत्तिः। 'आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्' इति सूत्रे पर्युदासवृत्त्या प्रत्ययविधिविषयत्वात्। प्रसज्यप्रतिषेधमाश्रित्य निषेधकत्वकल्पने तु स्फुटमेव गौरवम्।

—पृ. २५९, पं. १४-१६

६८. इत्याहुरिति। अत्र अरुचिबीजं तु अनभिधाने प्रमाणाभावः। न च 'न पदान्ताः परेऽणः सन्ति' इति 'लण्'सूत्रस्थं *भाष्यं* प्रमाणम्, इति वाच्यम् कर्तृ, अग्ने, वायो, ययौ, इत्यादीनामभावापत्तेः। 'अणोऽप्रगृह्यस्य' इत्यत्र पर्युदासे हलां व्यावृत्तिसिद्धौ परेण अण्ग्रहणं व्यर्थम्, इत्यर्थपर*भाष्यस्य* सत्त्वाच्च। तस्माद् वकारानुवृत्त्या लोपो भवत्येव।

—पृ. २६७, पं. १७-२१

६९. अत एवेति। नियमाश्रयणं तु 'लोके लोपे सत्येव पादपूरणे लोपः, नान्यत्र' इत्येतदर्थमिति भावः।

एतेन बहुलग्रहणात् 'लोपस्य काचित्कत्वं कल्प्यम्' इत्यपास्तम्। छन्दस्यभावदर्शनेन लक्षणानां काचित्कत्वकल्पनाया अन्यत्रादृष्टत्वात्।

—पृ. २७०, पं. १७-२०

७०. न च 'प्रकृत्यान्तः' इति प्रकृतिभावः शङ्क्यः। *प्रातिशाख्या*नुरोधेन अस्यात्राप्रवृत्तिः, इति मूले उत्तरत्र स्पष्टत्वात्।

—पृ. २७१, पं. ७, ८

### *भावप्रकाशस्थमान्यग्रन्थः*

एतेन "अत्र अरुचिबीजं तु पारमगोपुच्छिकम्, गौपुच्छिकम्, इत्यादाविष्टप्रत्ययानापत्तिः। 'आर्हादगोपुच्छ' इत्यस्य पर्युदासतया प्रत्ययविधिविषयत्वात्। प्रसज्यप्रतिषेधमाश्रित्य निषेधकत्वकल्पने तु स्फुटमेव गौरवम्' इति वदन्तो *मान्याः* प्राचामनुरोधेन" इति ध्वनितम्। —पृ. ३०८

यत्तु *प्रकाशकृन्मान्यरत्नाकरादयः* "अनभिधाने मानाभावात् तत्र लोपे इष्टापत्तिः, अशि हलीति व्याख्याय 'वृक्षव् करोति' इत्यादौ न दोषः" इति *भाष्यकृ*दुक्तिविरोधाच्च 'न पदान्त' इति *भाष्यस्य* अन्यतात्पर्यकत्वाच्च। तस्माद् वकारानुवृत्त्या तल्लोपो भवत्येव।'

—पृ. ३१९

.... तन्न। छन्दस्यभावदर्शनेन लक्षणानां काचित्कत्वकल्पनायाः काप्यदृष्टत्वात्। 'लोके लोपे सत्येव पादपूरणे लोपो नान्यत्र' इत्येवं नियतशास्त्रार्थनियमस्यावश्यकत्वाच्च, इति *मान्याः*, तत् प्राचामनुरोधेन।

—पृ. ३२३

अत एव '*प्रातिशाख्या*नुरोधेन अस्यात्राप्रवृत्तिः, इति मूले उत्तरत्र स्पष्टत्वात्' इति *मान्यो*क्तिः सङ्गच्छते।

—पृ. ३२३

**इति प्रथमं परिशिष्टम्**

# द्वितीयं परिशिष्टम्

# द्वितीयं परिशिष्टम्

## लघुशब्दरत्नकर्तुः स्वकीयान्यग्रन्थनिर्देशाः

### द्वितीयस्य परिशिष्टस्य विषये किञ्चित् :—

### 'इत्यन्यत्र विस्तरः'

अथ द्वितीयेऽस्मिन् परिशिष्टे 'इत्यन्यत्र विस्तरः' 'इत्यन्यत्र प्रपञ्चितम्' 'अत्र यद् वक्तव्यम्, तदन्यत्रोक्तम्' इत्यादिलघुशब्दरत्नस्थपङ्क्तीनां *पायगुण्डेमहोदयैः भावप्रकाशे* यत् स्पष्टीकरणं क्रियते, तदत्र सप्रकरणं सन्दर्भपुरःसरं च प्रदर्श्यते। *लघुशब्दरत्नस्य नागेश*कर्तृकत्वे यानि प्रमाणानि साम्प्रतमुपलभ्यन्ते; तेष्वन्यतमं प्रबलं प्रमाणमिदम्।

यतो हि *लघुशब्दरत्ने* यत्र यत्र 'अन्यत्र विस्तरः' 'अत्र यद् वक्तव्यम्, तदन्यत्रोक्तम्' इत्यादिप्रकारको ग्रन्थः समुपलभ्यते, तत्र तत्र चेत् अन्यत्रशब्देन *नागेश*ग्रन्थानामेव निरूपणम् *नागेश*शिष्यैरेव *पायगुण्डेभैरवमिश्रादिभिः* क्रियते; तर्हि *लघुशब्दरत्नोऽपि नागेश*कर्तृक एव; इति अनायासेन तर्कसुसंवादितयैव वक्तुं सुशकम्। न हि अन्यदीयग्रन्थानां स्वोत्तरकालीनानाम् असकृन्निर्देशः स्वकीयग्रन्थे प्रमाणत्वेन सम्भाव्यते; विशेषतश्च स्वग्रन्थोत्तरं बहोः कालादनन्तरं निर्मितानां स्वशिष्यग्रन्थानाम्।

किञ्च [1]'अत एव न *शब्देन्दुशेखर*विरोधः' [2]'न चैवं सति *परिभाषेन्दुशेखर*विरोधः' [3]'तस्य तत्रैवोद्द्योते खण्डितत्वात्' [4]''इमामेव अरुचिं ध्वनयितुं *शब्देन्दुशेखरे* 'हरदत्तः' इति लिखितम्'' इत्येतादृशाः *पायगुण्डेमहोदयैरुपस्थापिता* हेतवः *लघुशब्दरत्नस्य नागेश*कर्तृकत्वमेव स्पष्टीकुर्वन्ति।

### 'इति गुरुचरणाः' 'इति मान्याः'

किञ्च *पायगुण्डेमहोदयैः* स्वकीये *भावप्रकाशे लघुशब्दरत्न*विवरणावसरे [5]'इति *गुरुचरणाः*' [6]'इति *गुरुचरणानामाकूतम्*' इत्यादि कृतं स्पष्टीकरणं निःसन्दिग्धतयाऽस्मिन् परिशिष्टेऽवलोकयितुं शक्यते। *वैद्यनाथपायगुण्डेमहोदयानां गुरुचरणास्तु परिभाषेन्दुशब्देन्दुमञ्जूषोद्द्योता*दिनैकव्याकरणग्रन्थानां प्रणेतारः *नागेशभट्टाः* एव, इति तत्कर्तृकत्वमेव *लघुशब्दरत्नस्य* इति अस्मात् परिशिष्टात् स्पष्टं भवति।

---

1. *ŚR.* page 300, line 23.
2. *ŚR.* page 302, line 18.
3. *ŚR.* page 301, line 10.
4. *ŚR.* page 303, line 10.
5. *ŚR.* page 299, line 10.
6. *ŚR.* page 299, line 16.

किञ्च *'अत्र मान्याः'* इत्यस्य विरोधिमतप्रदर्शनार्थं प्रतिद्वन्द्वितया *"अत्र गुरुचरणाः'* इत्येवं निर्देशोऽपि अस्मिन् विषयेऽत्यन्तं महत्त्वपूर्णः अत्र परिशिष्टे लभ्यते, इत्यपि वैशिष्ट्यमस्य परिशिष्टस्य ।

**स्थलाङ्कादिनिर्देशपद्धतिः**

अस्मिन् हि परिशिष्टे प्रथमतः [1]*लघुशब्दरत्नग्रन्थः* आवश्यकतानुसारं ससन्दर्भमुपस्थाप्यते । तत्र 'अन्यत्र' इति शब्दः स्थूलाक्षरैर्निर्दिश्यते । ततश्च *लघुशब्दरत्नस्य* पृष्ठाङ्कनिर्देशः क्रियते । तस्य च अधस्तात् 'अन्यत्र'शब्दार्थप्रतिपादकः तत्सम्बन्धी च *भावप्रकाशग्रन्थः* दीयते । केषुचन स्थलेषु *भैरवमिश्रकृता भैरवी* इत्याख्या टीकाऽपि यथासम्भवमस्मिन् कर्मणि उपयुज्यते । द्वित्रेषु स्थलेषु नेनेशास्त्रिकृतायाः *सरला*नाम्न्याष्टीकाया अपि महत्त्वपूर्णोंऽशः समुद्ध्रियते । अत्र सर्वत्र पृष्ठाङ्कनिर्देश एव क्रियते न पङ्क्तिनिर्देशः ।

**सेयं नागेशकृतिः**

एवं च *नागेशभट्टानां* साक्षाच्छिष्यं पण्डित*वैद्यनाथपायगुण्डे*महाभागमारभ्य पण्डितनेनेशास्त्रिसदृक्षं विंशतितमशतकस्थमहावैयाकरणं यावत् सर्वेषामपि पण्डितानां टीकाग्रन्थतः *'लघुशब्दरत्नः नागेशभट्टकृतः'* इत्ययमेव सिद्धान्तः प्रतिपादयितुं शक्येत । अस्मिन् कर्मणि च इदं द्वितीयं परिशिष्टं महदुपकारकम् ।

**इदं चात्र अवधार्यताम् :**

अस्मिन् हि परिशिष्टे उद्धृताः केचन विषयाः प्रथमे एव परिशिष्टे समागताः, केचन च तृतीयेऽपि परिशिष्टे सङ्गृहीता भवेयुः । आपाततोऽवलोक्यमाने पाठकानां मनसि पौनरुक्त्यशङ्का समुदियात् । परन्तु येषां विषयाणां यस्मिन् यस्मिन् सन्दर्भे प्रकरणे चावश्यकता, तत्र तत्र तेषां सर्वेषामपि विषयाणां झटिति सौकर्येण चोपस्थितेरावश्यकतया निर्देश-प्रतिनिर्देशपद्धत्या (Reference and Cross-Reference) तत्र तत्र आवश्यकतानुसारं ते ते विषयाः संस्थापिताः; इत्येवावधारयन्तु पाठकमहोदयाः ।

---

१. काशी-संस्कृत-ग्रन्थमाला. क. १२५. शब्दरत्नभैरवीभावप्रकाशसरलायुता प्रौढमनोरमा. व्याकरणविभागे षोडशं पुष्पम् १९३९.

१. फलं तु 'बहुपुम्कृह' इत्यादौ 'पुमः खय्यम्' इति **रुत्वम्**। —लशर. ७

**रुत्वमिति**। रुशब्द इत्यर्थः। अनुस्वारशास्त्रस्यासिद्धत्वात्, इत्यर्थः। अत्र यथा स्वप्रत्ययस्तथा *मञ्जूषादौ* स्पष्टम्। —*भाप्र*. ७

*परिभाषेन्दुशेखरे* स्पष्टतरं चैतत्। —*भाप्र*. २०

२. **चित्रगवीनामिति**। प्रत्यासत्त्या त्रिभक्त्याक्षिप्तप्रकृतेः कवर्गवदुत्तरपद-समासरूपाया एव ग्रहणेन 'कुमति च' इत्यनेन णत्वं न; इत्यादि वक्ष्यामः। —लशर. ६

**चित्रगवीणामिति**। 'कुमति च' इति णत्वम्। दन्त्यपाठस्तु लेखकप्रमादात्। —लशर. १९

**अत्र मान्याः**—प्रत्यासत्त्या ...... व्याश्रयत्वात् णत्वस्यैवाप्राप्तिः। —*भाप्र*. २२

**अत्र गुरुचरणाः**—लिङ्गविशिष्टपरिभाषया तत्प्रकृतौ समासत्वस्य सत्त्वात् तथाश्रयणेऽपि णत्वं भवत्येवेति। *भाप्र*. २३

३. तत्र अस्तिग्रहणाभावे तस्यान्यफलकत्वे वा सूत्रानुपात्तास्त्यर्थान्तर्भावेण 'चित्रा गावोऽस्य सन्त्यनन्तराः' इत्याद्यर्थे बहुव्रीहिमत्वर्थीयौ न भवतः, अनभिधानात्; इति स्पष्टमाकरे। —लशर. २६-२७

एतेन अर्थकृतबहिरङ्गत्वानाश्रयणात् इदं चिन्त्यम्, इत्यपास्तम्। तथा दृष्टान्तोक्तेराशयोऽप्युक्त एव, इति वैधर्म्ये एवायं दृष्टान्तः; इति *गुरुचरणानामाकूतम्*। —*भाप्र*. २७

४. ननु 'रलयोः' इति न्यूनम्। **टकारस्यापि** मध्यगत्वादित्यत आह:—

**प्रत्याहारेष्विति**। —प्रौम. ५५

**टकारस्यापीति**। अत्र यद् वक्तव्यम्, तत् अन्यत्र उक्तम्। —लशर. ५५

**अत्र यदिति**। रप्रत्याहारविषये यद् वक्तव्यं खण्डनं तत् *शब्देन्दुशेखरे* उक्तमित्यर्थः। —*भाप्र*. ५५

**अन्यत्र**—*शब्देन्दुशेखरे*। —*भैरवी* ५५

५. 'नासिका च' इति **चकारेण** स्वस्ववर्गानुकूलं ताल्वादि समुच्चीयते। —प्रौम. ६९

**चकारेणेति**। अत्र यथा नासिकायाः स्थानत्वं तथान्यत्र निरूपितम्। —लशर. ६९

**अन्यत्र**—*शब्देन्दुशेखरादौ*। —*भाप्र*. ६९

६. प्रकृते तु निरधिष्ठानारोपासम्भवेन हननसजातीयं प्रयोगे कार्यप्रवर्तनमावश्यकमेव, इति अन्यत्र विस्तरः । —लशर. ७६-७७

**इति अन्यत्र विस्तरः** इति । इत्यादिकं शब्देन्दुशेखरादौ द्रष्टव्यमिति भावः । —भाप्र. ७७

७. न च स्त्र्यर्थनिमित्तकटापो बहिरङ्गासिद्धत्वम् । 'नाजानन्तर्ये' इति निषेधात्, ततोऽपि बहिर्भूतसङ्ख्यानिमित्तकविभक्तिनिमित्तकभसंज्ञानिमित्तकत्वेन लोपस्य बहिरङ्गत्वाच्च । **अर्थनिमित्तकबहिरङ्गत्वस्याभावाच्च** । —लशर. ८७-८८

ध्वनितं चेदं 'नलोपः सुप्' इति सूत्रे *भाष्ये*, इति तत्रैव उद्द्योते परिभाषेन्दुशेखरे च निरूपितं *गुरुचरणैः*, अत आह :—**अर्थनिमित्तेति** । —भाप्र. ८८

८. क्रियात्वं च साध्यत्वेन प्रतीयमानत्वम् । —लशर. ९०

स्पष्टं चेदं 'याडापः' इत्यत्र *उद्द्योते*, निर्जरशब्दे शब्देन्दुशेखरे च ।—भाप्र. ९०

९. साध्यत्वं चोत्पाद्यमानत्वमेव, इति अन्यत्र विस्तरः । —लशर. ९०

स्पष्टीकृतं चैतत् *गुरुचरणैः* धात्वर्थवादे, उपसर्गवादे च *मञ्जूषायाम्* । तदाह—**अन्यत्रेति** । —भाप्र. ९०

१०. सूत्रशेषभाष्योक्तेषु आणवयति, वट्टयति, इत्यादिषु च धातुत्वे शास्त्रविषयतया साधुत्वापत्तिः, इति तद्व्यावृत्तये तद् इति भावः । —लशर. ९३

न हि साधुत्वासाधुत्वे नियते, किन्तु अन्यादृशे, इति स्पष्टं *मञ्जूषायाम्* । —भाप्र. ९३

११. **गुणवृद्धिशब्दाभ्यामिति** । एतच्च पूर्वसूत्राभ्यां गुणवृद्धिपदे अनुवर्त्य 'गुणो वृद्धिरिति ये गुणवृद्धी' इति **योजनया** लभ्यते । —प्रौम. ९६

**योजनयेति** । यद्यपि तदनुवृत्त्यैव सिद्धे सामर्थ्याच्छब्दव्यापाराश्रयणेन लभ्यते मूलोक्तार्थः, तथापि **मन्दबुद्धिसाधारण्येन** स्फुटत्वायैवमुक्तम् । —लशर. ९६-९७

अत एव **मन्दबुद्धीति** फलमुक्तम् । अत एव न शब्देन्दुशेखरविरोधः, इति बोध्यम् । —भाप्र. ९७

१२. अन्तरङ्गस्य बलवत्त्वे ज्ञापकम् अन्यत्र प्रपञ्चितम्। —लशर. १२०

क्वचित् पूर्वोपस्थितनिमित्तकत्वरूपान्तःकार्यत्वरूपम् अन्तरङ्गम्, तद्विरुद्धं बहिरङ्गम्, इत्यादि स्पष्टं *परिभाषेन्दुशेखरे*। —*भाप्र.* १२०

**अन्यत्र**—*परिभाषेन्दुशेखरादौ*। —*भाप्र.* १२०

१३. **यदि तु** 'सेदुषः' इत्यादौ पदावधिकेऽन्वाख्याने 'सेद वस् अस्' इति स्थिते इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितकत्वात् पूर्वं सम्प्रसारणे, वलादित्वाभावात् इटः प्राप्तिरेव न, लक्ष्यानुरोधाच्चात्र पदावधिकमेवान्वाख्यानम्, इति तत्सिद्धिः, इत्युच्यते, तदैषा परिभाषा निष्फला, इति बोध्यम्।—लशर. १२२-१२३

ननु 'अकृत' इत्यस्य सत्त्वे किमर्थं *भाष्ये* क्वापि नोल्लेखः। न च 'असिद्धवदत्राभात्' इत्यत्रत्य*कैयटोक्त*प्रकारद्वयेन निर्वाहः; तस्य तत्रैव *उद्द्योते* खण्डितत्वात्, अत आहः—**यदि त्विति**। —*भाप्र.* १२२

१४. अत एव एषा *भाष्ये* न क्वापि व्यवहृता, इति अन्यत्र विस्तरेण निरूपितम्। —लशर. १२३-१२४

ज्ञापकानां त्वन्तरङ्गपरिभाषानित्यत्वज्ञापकतैव, इति निर्मूलत्वमेव, इति भावः, तदाहः–**अन्यत्रेति**। *परिभाषेन्दुशेखरे* इत्यर्थः। —*भाप्र.* १२३-१२४

**अन्यत्र**—*परिभाषेन्दुशेखरादौ*। —*भैरवी* १२४

१५. न च जातिपक्षे अणुदित्सूत्रे अण्ग्रहणप्रत्याख्याने 'उपसर्गादृति' इत्यादौ ऋकारेण ऌकारग्रहणाय सावर्ण्य**वचनस्थाने** ऌवर्णस्य ऋवदतिदेशात् रेफापत्तिः, इति वाच्यम्; क्लृप्तशिखार्थं तस्यातिदेशस्य अनित्यत्वावश्यकत्वात्। —लशर. १३५-१३६

**°वचनस्थाने इति**। शब्देन्दुशेखरविरोधस्तु न, लाघवानादरेण तत्प्रवृत्तेः; इति भावः। —*भाप्र.* १३५

१६. ...... जातिग्रहणप्राप्तसवर्णग्रहणनिषेधकः **तपरसूत्रवत्** इति 'त्यदादीनामः' इत्यादौ न दोषः। —लशर. १३६-१३७

**तपरेति**। 'तद्धच्च तपरकरणम्' इति 'अइउण्'सूत्रभाष्योक्तरीत्या यथा तस्य तन्निषेधकत्वम्, तद्वत्; इत्यर्थः। तुल्यन्यायादिदमपि तेनैव बोधितम्। ध्वनितं चेदं 'व्यादादीपसा' इति सूत्रे *भाष्ये*; इति स्पष्टं तत्रैव *उद्द्योते*। —*भाप्र.* १३७

१७. अत्र त्वस्यैव दोषत्वमिति भावः । —लशर. १४६-१४७

स्पष्टं चेदं तत्सूत्रेष्वेव *उद्द्योते* । 'न लुमता' इति सूत्रस्य-*उद्द्योत*-शब्देन्दुशेखरादिग्रन्थास्तु *मान्या*नुयायिनः; इति न तद्विरोधः । वस्तुतः शेखरतात्पर्यमन्यत्र प्रतिपादितम्; इति तदविरोध एव; इति बोध्यम् । —*भाप्र.* १४७

१८. यद्यपि वत्वं हल्त्वाद्यपेक्षया विशेषधर्मः, तथापि एतद्वाक्योपप्लुते 'वकारवत् उकारः' इति **वाक्ये** उपात्तधर्मापेक्षया न तस्य तत्त्वम् । —*लशर.* १५१-१५२

एवं च '**वाक्ये**' इत्यस्य 'उपादाने' इत्यत्रान्वयः, न तु 'तत्त्वम्' इत्यत्र । तथा सति अन्यत्रोपात्तधर्मापेक्षया वत्वस्य तत्त्वेन तदभावस्य वक्तुमशक्यत्वात् । अत एव समस्तो*द्द्योत*पाठसङ्गतिः । *भाप्र.* १५२

१९. अतः प्रत्ययत्वं स्थानिवत्त्वेन भवत्येव, इति भावः । —*लशर.* १५५-१५६

ध्वनिता चेयं रीतिः 'विशिष्टं ह्येषोऽनल्त्वमाश्रयते' इति *भाष्येण*, इति स्पष्टम् *उद्द्योते* । —*भाप्र.* १५५

२०. फलं तु 'यातिः' इत्यादिसिद्धिः; इति दिक् । —लशर. १६८

न चैवमपि 'आरति' इत्यत्र शब्देन्दुशेखरे उक्ताभ्यासकार्ये तदनवयवधात्ववयवादेशस्य तत्प्रतिबन्धकस्थानिवत्त्वं न, इत्यर्थस्य 'अभ्यासस्यासवर्णे' इत्यनेन ज्ञापितत्वम्, इति रीत्या 'यातिः' इत्यत्रापि अल्लोपरूपाभ्यासकार्ये ...... । अत एव अभ्यासकार्ये तदुत्तरखण्डादेशस्य, इत्याद्येव *परिभाषेन्दुशेखरे* उक्तम् । —*भाप्र.* १६९-१७०

न चैवं सति *परिभाषेन्दु*शेखरविरोधः, तत्र हि 'अरियृयात्' इत्यत्र स्थानिवत्त्वेन इयङ् भवत्येव, तस्य स्थानिवत्त्वस्य अभ्यासकार्यप्रतिबन्धकत्वाभावात्; इत्युक्तम् । —*भैरवी.* १६९

२१. न च अस्मादेव ज्ञापकात् तस्याशास्त्रीयत्वेऽपि स्थानिवत्त्वेन तत्त्वम्, **फलाभावात्**, तद्घटितसन्निवेशापेक्षस्य ततः पूर्वत्वस्यातिदेशसहस्रेणाप्यतिदेष्टुमशक्यत्वाच्च, 'भोभगो' इति सूत्रस्थ*भाष्य*रीत्या तस्य स्थानिभूताल्वृत्तिधर्मत्वेन 'अनल्विधौ' इति निषेधाच्च, विशेषणतयाऽलाश्रयणाच्च । —लशर. १७०-१७१

अत्र *मान्योक्त्या* तावत् समाधत्ते—**फलाभावात्** । —*भाप्र.* १७१

........ उक्तहेतोः, परनिपातयोग्यस्य पूर्वनिपातकरणेन तत्सामर्थ्येन तत्साहचर्येण प्रतिपदोक्तलत्वस्यैव तत्र ग्रहणात्, इति *भाष्याशयाच्च*; इति *मान्यमत*निष्कर्षः ।

अभ्युपेत्येदम् ।

अत्र *गुरुचरणाः*—लोलुवादिसिद्धिः फलमस्त्येव । 'न धातु' इति प्रत्याख्यानस्य *भाष्यकृतः* सिद्धान्तत्वेनाभिमतत्वात् । —भाप्र. १७१

........ उक्तार्थस्य शब्दमर्यादया लाभाच्च, इति उद्द्योतोक्तरीत्या निर्वाहः इति वाच्यम्........ । —भाप्र. १७२

यत्तु ईदृशरीत्या पञ्चमीसमासेन तत्त्वस्य *भाष्ये* कल्पनाश्रयणात् *उद्द्योतः* चिन्त्य इति, तन्न ।........ —भाप्र. १७२

........ न चैवमपि *उद्द्योत*विरोधः, तस्य पञ्चमीसमासस्य लक्ष्यसामान्यपरत्वाभिप्रायकत्वात् ।........ —भाप्र. १७२

........ इमामेव अरुचिं ध्वनयितुं शब्देन्दुशेखरे तत्र हरदत्तः इति लिखितम् । —भाप्र. १७२

........ *कैयटस्य* तु प्रमाद एव, इति स्पष्टम् *उद्द्योते* । ........—भाप्र. १७२

........ अत एव *उद्द्योतादौ* आद्यहेतुरेवोक्तः । —भाप्र. १७३

........ तस्मात् *उद्द्योतोक्त*पक्षोऽपि सम्यगेव, इति न तद्विरोधः । —भाप्र. १७३

२२. 'हयवरट्'सूत्र*भाष्य*रीत्या तत्र सवर्णग्रहणापकर्षेण तस्यापि सवर्णविधित्वात्; इति **अन्यत्र** विस्तरः । —लशर. १७५-१७६

सप्तम्यन्तपाठस्तु *भाष्ये* दूषित एव; तदाहः—**अन्यत्रेति** । *उद्द्योतादौ* इत्यर्थः । —भाप्र. १७६

**अन्यत्र**—'चतुर्मुखः' इत्यस्य साधनावसरे । —*भैरवी* १७६

२३. **एकत्वसङ्ख्येति** । अभेदैकत्वसङ्ख्या, इति तदर्थः । **सङ्ख्या**सामान्याभाव इति यावत् । —लशर. ११७-१७८

........ अत आहः—**सङ्ख्येति** । सामान्यरूपेण सामान्यस्य विशेषाणां चाभानम्, इत्यर्थः । एतेन 'वृत्तौ सङ्ख्याविशेषो न भवति, इत्यस्यैव समर्थसूत्रभाष्ये *उद्द्योतमञ्जूषयोश्चोक्त्या* तद्विरोधः' इत्यपास्तम् । —भाप्र. १७८

२४. 'इरयो रे' इति सूत्रे इरयोः इति द्विवचनं तु स्वविधेयस्य स्वस्मिन् **उद्देश्यत्वाप्राप्त्या** तत्प्राप्तये, इति न तदस्यां मानम्। —लशर. १६४-१६५

न हि *गुरुचरणैस्तदवच्छेदकयोर्भेदे* उद्देश्यत्वविधेयत्वे उक्ते। किन्तु उद्देश्यत्वं विधेयत्वं च मिथो विरुद्धम्, भेदे तत्सम्भवात्; इत्युक्तम्। ...... तदेतत्सर्वमभिप्रेत्य स्वविधेयस्य **स्वोद्देश्यत्वाप्राप्त्या**, इत्येवोक्तमिति दिक्।

लाक्षणिकत्वात् सागमेन स्यात्, अतो द्विवचनमुपक्षीणमित्यज्ञापकम्, इति *मान्याः*। —भाप्र. १६५

२५. **विकारान्यानुपूर्व्यैक्येन** लक्ष्यैक्यं तु ममाप्यस्त्येवेति दिक्। —लशर. १९६-१९७

न चैवं **विकारान्यानुपूर्व्या** भेदः, इति 'इको गुण' इति सूत्रस्थोद्*द्योत*विरोधः, इति वाच्यम्। विकारशब्दस्य अर्शआद्यजन्तत्वेन तद्वदानुपूर्वीतोऽन्यागमादिकृता याऽनुपूर्वी तस्यास्तद्रहितानुपूर्वीतो भेदः, इति तदर्थात्। —भाप्र. १९७

२६. वस्तुतः तत् षाष्ठद्वित्ववत् न स्थाने द्विर्वचनम्, इति **अन्यत्र** निरूपितम्। —लशर. १९८

**अन्यत्रेति**। शब्देन्दुशेखरादौ, इत्यर्थः। —भाप्र. १९८

२७. **विसर्जनीयसूत्र***भाष्या*त्तु कार्यकालपक्षेऽपि त्रिपाद्यां तदप्रवृत्तिः, इति लभ्यते। —लशर. २००

सिद्धान्तितमाहः—**विसर्जनीयेति**। तद्विधिसूत्रस्थात् 'असिद्धं बहिरङ्गम्' 'पूर्वत्रासिद्धम्' इत्यनयोर्मिथः उपमर्द्योपमर्दकत्वप्रतिपादकात् 'कुतो न खल्' इत्यादि 'अतोऽयुक्तः परिहारो न वा बहिरङ्गलक्षणत्वात्, इति' इत्यन्त*भाष्या*त्, प्रत्यक्षेणानुमानिक्या बाधः, इति सिद्धान्ताशयकात्, इत्यर्थः। स्पष्टं चेदमुद्*द्योते*। —भाप्र. २००

२८. 'रेफोष्मणां सवर्णा न सन्ति'। —लशर. २०४

एतेन सप्तम्यन्तपाठाशयकमिदं *भाष्यम्*, इति कैयटाद्युक्तिर्निरस्ता। उक्तरीत्योपपत्तेः। तत्पाठस्य *भाष्ये* दूषितत्वाच्च, इति स्पष्टमुद्*द्योते*। —भाप्र. २०४

२९. न च द्वित्वभिन्ने पूर्वत्र कर्तव्ये परम् असिद्धम्, इत्यर्थकेन 'पूर्वत्रासिद्धमद्वित्वे' इत्यनेन धातुधकारस्य जश्त्वे 'दस्य' इति वक्तुमुचितम्, इति वाच्यम्; फले विशेषाभावेन तदनादरणात्। —लशर. २१२-२१३

**इत्यर्थकेनेति**। इति विध्यर्थतात्पर्यकेन, इत्यर्थः। द्वित्वे पूर्वत्र परमसिद्धं न, इत्यर्थस्तु न; असमर्थसमासापत्तेः, निषेधविधौ गौरवाच्च। स्पष्टं चेदं *परिभाषेन्दुशेखरे*।

—*भाप्र.* २१३

३०. न च 'वृद्धिरेचि' इति सिद्धिः, 'ओमाङोश्च' इत्यनेन बाधात्; अनेन तु सामर्थ्यात् तद् बाध्यते; इति वाच्यम्; तस्या**नभिधानात्** इत्याशयात्।—*लशर.* २१६

**अनभिधानादिति**। इदं दुर्वचम्, इति शेषः। ........ स्पष्टं चेदम् *उद्द्योते*। —*भाप्र.* २१६

३१. **अनन्यत्वादिति**। न च 'अचः परस्मिन्' इति स्थानिवत्त्वेन एजादित्वं सुलभम्; पूर्वपरविधित्वात्। **पूर्वस्यैव विधौ** हि सः। —*लशर.* २१७

**पूर्वस्यैव विधाविति**। तेन 'आरतुः' इत्यादौ 'ऋच्छत्यॄताम्' इति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वम्, इति *शब्देन्दुशेखरे* निरूपितम्। —*सरला* २१७

३२. **अलोऽन्त्य**परिभाषया निर्दिश्यमानपरिभाषया च 'णेरनिटि' इत्यस्य 'ण्यन्तस्याङ्गस्य अन्त्यो यो निर्दिश्यमानो णिः तस्य लोपः' इत्यर्थेन दोषात्।

—*लशर.* २१८

**अलोऽन्त्येति**। तत्राविरोधेन बाध्यबाधकभावाभावादुपस्थितेः। ......... स्पष्टं चेदं *परिभाषेन्दुशेखरे* इति भावः। —*भाप्र.* २१८

३३. **यत्क्रियेति**। **यदर्थ**क्रियायुक्ता इत्यर्थः। —*लशर.* २३०

**यदर्थेति**। अत्र यथा 'गतिकारकोप' इति सूत्रस्थ**शब्देन्दुशेखर**विरोधो न; तथा तत्रैव 'परे तु' इत्यादिना स्पष्टम्। —*भाप्र.* २३०

३४. अत्र च 'स्थानिवत्'सूत्रस्थं *भाष्यं* मानम्; इति **अन्यत्र** विस्तरः।

—*लशर.* २४०. २४१

**इति अन्यत्रेति**। उद्द्योतादौ इत्यर्थः। —*भाप्र.* २४०

३५. संज्ञाया एकत्वात्, ज्ञापकस्य च विशेषापेक्षत्वेन संज्ञाभेदविषयत्वात्, इति भावः, इति केचित्। —*लशर.* २५३

**केचिदिति** । मूलानुयायिनो *मान्याः*, इत्यर्थः । अत्रारुचिबीजं तु 'साक्षात्प्रभृति' इति सूत्रस्थ*भाष्य*विरोधः । ... ... "पुनःप्रसङ्गेति' परत्वाद् विकल्पेऽपि तदभावे नित्यविधिप्राप्त्या न दोषः; इति भावः । न च प्राप्तविभाषाविषये वैकल्पिकाभावे नित्याङ्गीकारे विकल्पशास्त्रवैयर्थ्यापत्तिः, अभ्यन्ते चारितार्थ्यात्' इत्युद्द्योतश्च ।

—*भाप्र.* २५३

३६. **श्रोततिरु**पदेशे सादिः । एवं च अत्रत्यं मूलं निर्दुष्टमेव, इति अत्रत्य-*शब्देन्दुशेखरो* हलन्तस्थ*शब्दरत्नश्च* अयुक्तः, तत्रत्यमूलानुयायी ।

....... तस्मादेकवाक्यता अयुक्ता । अत एव बृहच्छब्देन्दुशेखरसङ्गतिः, इति । तदेतत् ध्वनयन्नाह:—**श्रोततिरिति** । —*भाप्र.* २७०

३७. **सत्वप्रसङ्गादिति** । **चानुकृष्ट**विसर्गस्तु सत्वापवादः, इति नास्माकं दोषः; इति भावः । —*लशर.* २८६

**चानुकृष्टेति** । अस्वरितत्वादेव वाऽननुवृत्तिः, इति भावः । तथा च अगत्या अत्र तस्य सङ्कोचः कल्प्यते । एतेन 'शेखरविरुद्धम् इदम्' इत्यपास्तमिति ।

—*भाप्र.* २८६

३८. **'असमासे** निष्कादिभ्यः' इति सूत्रे *भाष्ये* कैयटे च स्पष्टमनयोः प्रत्ययविधिविषयता, इति दिक् । —*लशर.* ३०८-३०९

एवं च तत्*कैयटात्* तथा न लभ्यते, इति इदमयुक्तम् । अत एव अयं **कैयटः** *परिभाषेन्दुशेखरे* सम्मतित्वेन न लिखितः, अत आह:—**असमासे** इति ।—*भाप्र.* ३०८

३९. 'अनल्विधौ' इत्यस्य स्थान्यल्वृत्तिधर्माश्रये स्थानिसम्बन्ध्यल्वृत्तिधर्माश्रये च न, इत्यर्थः । तत्र स्थान्यल्रेफवृत्ति उत्वं स्थानिवत्त्वेन दुर्लभम्, अल्विधित्वात्; स्पष्टं चेदं प्रकृतसूत्रे *भाष्ये* ........ —*लशर.* ३११-३१२

तत्रत्यकैयटस्तु चिन्त्य एव, इति स्पष्टम् उद्द्योते । —*भाप्र.* ३१२

**इति द्वितीयं परिशिष्टम्**

# तृतीयं परिशिष्टम्

# तृतीयं परिशिष्टम्

## लघुशब्दरत्नेन कृतं शब्दरत्नस्य खण्डनम्

### तृतीयस्य परिशिष्टस्य विषये किञ्चित् :

तृतीयेऽस्मिन् परिशिष्टे *लघुशब्दरत्नेन शब्दरत्नस्थ*विषयाणां क्रियमाणं खण्डनं सन्दर्भप्रकरणसङ्गतिनिर्देशपुरःसरं साधकबाधकप्रमाणोपन्यासपूर्वकं च प्रदर्श्यते ।

प्रथमे परिशिष्टे द्वितीये च परिशिष्टे कृतमन्यग्रन्थोद्धरणरूपं कार्यं कठिनं जटिलं गवेषणापद्धतिमन्त्रतन्त्रमात्राधीनं चासीत् । अस्मिन् परिशिष्टे क्रियमाणं कार्यं तु कठिनं जटिलं गवेषणापद्धतिमन्त्रतन्त्राद्यवलम्ब्य प्रवर्तमानमपि अन्ततो गत्वा विवादास्पदमेव भवेत्; इति महान् संशय आसीदस्माकं मनसि प्रारम्भावसरे । यतः अस्माभिः स्वमत्या प्रदर्शितं *लघुशब्दरत्नशब्दरत्नयो*र्मतभेदस्वरूपं सर्वेऽपि पण्डिताः ऐकमत्येन स्वीकुर्युरेव इति वक्तुं दुःशकम् । यतः तत्रापि केषुचन विषयेषु *लघुशब्दरत्नशब्दरत्नयो*र्मतभेदो वर्तते न वा ? इत्यस्मिन् विषयेऽपि मतभेदः स्यादेव ।

### अधिकारी पण्डितः

अतः एतादृक्षे विषये निर्णयार्थं केनापि अधिकारिणा पण्डितेन भाव्यम्; यः खलु उभयोर्ग्रन्थयोर्वर्तमानं मतभेदस्वरूपं समीचीनया रीत्या सर्वेषां पुरतः उपस्थापयितुं प्रभवेत् । सर्वेषामपि वैयाकरणानां सौभाग्येन अस्मिन्नपि विषये *हरिदीक्षितानां* प्रशिष्याः, *नागेशभट्टानां* साक्षाच्छिष्याः, *वैद्यनाथपायगुण्डे*महाभागा एव स्वमतं सुस्पष्टं प्रतिपादयितुं सन्नद्धाः वर्तन्ते । स्वीयासाधारणेन पाण्डित्येन विद्यावंशसम्बन्धेन च *वैद्यनाथपायगुण्डे*-महाभागानामस्मिन् विषये महान् अधिकारः, इत्यत्र नास्ति कस्यापि वैमत्यम् ।

### दिङ्मात्रमुदाह्रियते :

अतः अस्माभिः यद्यपि केवलं पञ्चसन्धिप्रकरणात्मके विभागे एव सप्तति-सङ्ख्याकाः खण्डनप्रकाराः प्रदर्शयितुं शक्यन्ते; तथापि तान् विहाय सर्वसम्मति-सम्पादनबुद्ध्या सौलभ्यार्थं च *पायगुण्डे*महाभागैः प्रदर्शितेषु खण्डनप्रकारेषु अतीव सुस्पष्टानि द्वात्रिंशत् उदाहरणान्येव अस्मिन् परिशिष्टे अत्रभवतां पुरस्तात् उपस्थाप्यन्ते । तदेतत् 'दिङ्मात्रमुदाहरणम्' (**Illustrative**); न तु सम्पूर्णं परिगणनम् (**Exhaustive**); इत्यवधारणीयम् । प्रथमे द्वितीये च परिशिष्टे तत्तद्विषयाणां प्रायः

सम्पूर्णं परिगणनं ( Exhaustive ) महता प्रयत्नेन कृतमासीत्; तत्र प्रदर्शितेषु विषयेषु एतादृशमतभेदप्रसङ्गोपस्थितेरभावात् ।

## अभिनवोपलब्धिः

*शब्दरत्नस्य* साक्षाच्छब्दोपनिबद्धं खण्डनं *लघुशब्दरत्नेन* स्वल्पेष्वेवोदाहरणेषु क्रियते । अन्यत्र प्रायः सर्वत्र व्यङ्ग्यमर्यादया, अत्यन्तं सूक्ष्मतया, कामप्यरुचिं वा मनसि निधाय वक्रोक्तिभङ्ग्यादिभिस्तावत्तया खण्डनं क्रियते, यथा आपाततोऽवलोकितं सत्, तत् *शब्दरत्न*खण्डनं वर्तते, इति ज्ञातुं कोऽपि नैव प्रभवेत् ।

किञ्च एतावत्कालपर्यन्तं *शब्दरत्नस्यो*पलब्धेरभावात् *लघुशब्दरत्नेन* स्थले स्थले तस्य खण्डनं क्रियते, इति वक्तुमपि दुःशकमासीत् । "केषुचन स्थलेषु *कैयटस्य*, कुत्रापि *जयादित्यवामनयोः*, क्वचिच्च *हरदत्तमाधवादीनाम्*, नैकेषु प्रसङ्गेषु च *भट्टोजिदीक्षितानां* खण्डनं वर्तते *लघुशब्दरत्ने*" इति यथा ज्ञातमासीत्; तथा *शब्दरत्नस्या*पि खण्डनमत्र वर्तते, इति केनापि मनसाऽपि न चिन्तितम् । परं कस्यचन अज्ञातस्य ग्रन्थस्य पण्डितस्य च खण्डनमत्र *लघुशब्दरत्ने* वर्तते; इति तु व्याकरणशास्त्रपारावारीणानां परम्परया गुरुमुखतो ज्ञातमासीदेव ।

## निर्विवादं खण्डनम् :

इदानीं तु चतसृणां मातृकाणां साहाय्येन चिकित्सकपद्धत्या सम्पादितस्य *शब्दरत्नस्य* अभिनवोपलब्ध्या *लघुशब्दरत्नशब्दरत्न*योर्मतभेदस्थलानि सप्रमाणपुरःसरं प्रदर्शयितुं शक्यन्त एव । अस्मिन् कर्मणि च सर्वात्मना योग्यतासम्पन्नानां *नागेश*शिष्याणां *वैद्यनाथपायगुण्डे*महाभागानामेव साहाय्यं लभ्यते; इति तु 'निर्विवादं खण्डनमिदम्' अस्माकं मतेन । एतदर्थमेव च अस्माभिः प्रथमे एव परिशिष्टे 'के नाम *मान्याः पायगुण्डे*महाभागानामभिमता आसन्' इत्यस्य सविस्तरमुपबृंहणं कृतम् । अयमंशोऽप्येतावन्तं कालं यावत् *शब्दरत्नस्या*नुपलब्ध्या नैव सुष्ठु ज्ञात आसीत् ।

## 'स्वरूपव्याक्रियैव पराक्रिया'

अत्र च परिशिष्टे प्राधान्येन प्रथमतः *शब्दरत्नः*, तदनन्तरं तस्य खण्डनार्थं प्रवृत्तो *लघुशब्दरत्नः*, ततश्च उभयोर्ग्रन्थयोर्मतभेदस्थलानि मर्मग्राहिकतया प्रदर्शनार्थं प्रवृत्तो *भावप्रकाश*ग्रन्थश्च उपस्थाप्यते । आवश्यकतानुसारं यथावकाशं च सन्दर्भप्रकरण-

सङ्गतिप्रदर्शनबुद्धया सति सम्भवे *प्रौढमनोरमा*ऽपि सर्वप्राथम्येन अत्रोपहारीक्रियते; येन सर्वोऽपि खण्डनप्रकारः विषयप्रकरणादिज्ञानेन सुलभो भवेत् ।

अत्र च पूर्वपक्षोत्थापनादिभिः विषयप्रकरणादिप्रदर्शनेन च 'अत्रत्यः खण्डनीयोऽशः कः ?' 'कानि च तत्र प्रमाणानि ?' 'के वा तत्र हेतवः ?' 'अन्ततो गत्वा कश्च सिद्धान्तितोऽशः खण्डनकारस्य अभिमतः ?' इत्यादयो विषयाः स्वकीयैः शब्दैरस्माभिर्नैवात्र विमृश्यन्ते । तथा विमर्शे क्रियमाणे पूर्वपक्षोत्तरपक्षस्थापनादिचर्चिकापत्त्या खण्डनमण्डनाद्यनन्तायासैश्च कष्टसाध्यं महदेव तद् विवरणं भवेत् । एवं कृतेऽपि अन्ततः विवाद एव विषयः । अतः 'स्वरूपव्याक्रियैव पराक्रिया' इति न्यायमवलम्ब्य खण्डनविषयीभूतस्य गुरुग्रन्थस्य शब्दरत्नस्य, खण्डनं कर्तुमुद्यतस्य शिष्यग्रन्थस्य *लघुशब्दरत्नस्य*, उभयोर्ग्रन्थयोर्मतभेदस्थलं प्रदर्शयितुं प्रवृत्तस्य प्रशिष्यग्रन्थस्य *भावप्रकाशस्य* च अत्र केवलं यथायथम् उद्धरणं क्रियते । एतेनैव च अत्रत्यविषयाणां समीचीनया रीत्या अभिप्रायाविष्कारो भवेत्, सकलं च परिशिष्टं सरलं यथार्थाभिप्रायप्रकाशकं च भविष्यति; इत्यस्माकं मतिः ।

स्थलाङ्कादिनिर्देशपद्धतिश्च पूर्ववदेव अत्राप्यनुस्रियते, इत्यवधारणीयमिति ।

१. आद्ये समासस्य **क्लिष्टत्वात्** । —*प्रौम.* ५; ३

**क्लिष्टत्वादिति** । क्लेशस्तु 'ङे प्रथमयोरम्' 'लसार्वधातुकम्' 'उदात्तस्वरितयोः' इत्यादाविव प्राप्तस्थान्यादेशसम्बन्धबाध एव । —*शर.* ५; ११-१२

**क्लिष्टत्वादिति** । 'ब्राह्मणस्य कम्बलः' इत्यादौ असत्यपि प्रकरणादौ स्वस्वामिभावादिप्रतीतिवत् अनन्तरसमीपादिशब्दप्रयोगमन्तरा सामीप्याद्यप्रतीतेः, तस्य षष्ठ्यर्थत्वाभावात्, तत्प्रयोगे त्वसामर्थ्यात् षष्ठीसमासाप्राप्तिः, इति मध्यमपदलोपिसमासे सौत्रे वा तत्र समासस्य क्लिष्टत्वमिति भावः । तदेतदाह—**न हीत्यादिना तत्रानिष्ट इत्यन्तेन** । —*लशर.* १९

**क्लिष्टत्वादिति** । यत्तु 'षष्ठी स्थाने' इत्यस्य बाध एव क्लेशः, इति *मान्याः*; तत् प्राचामनुरोधेन । उक्तरीत्या तदप्राप्तेः । 'न हि' इत्यादिघटितोत्तरग्रन्थास्वारस्यापत्तेश्च । अत एव 'तदेतदाह' इति वक्ष्यति ग्रन्थकारः । तद् ध्वनयन् क्लेशान्तरमाहः— **ब्राह्मणस्येति** । —*भाप्र.* १९

२. न वा चित्रगुशब्दात् **चित्रगवीनां** समीपवर्ती वृक्षादिः प्रतीयते ।

—प्रौम. ६; १-२

**चित्रगवीनामिति ।** प्रत्यासत्त्या विभक्त्याक्षिप्तप्रकृतेः कवर्गवदुत्तरपदसमासरूपाया एव ग्रहणेन 'कुमति च'इत्यनेन णत्वं न; इत्यादि वक्ष्यामः । —शर. ६; २२-२३

**चित्रगवीणामिति ।** 'कुमति च' इति णत्वम् । दन्त्यपाठस्तु लेखकप्रमादात् । एवं 'स्त्रीगवीणाम्' इत्येकशेषप्रकरणान्तस्थकैयटप्रयोगेऽपि बोध्यम् । —लशर. १९-२४

**अत्र मान्याः**—प्रत्यासत्त्या विभक्त्याक्षिप्तप्रकृतेः कवर्गवदुत्तरपदाक्षिप्तसमासरूपाया एव ग्रहणात्, अत्र तत्प्रकृतित्वं ङ्यन्तस्य, समासत्वं टजन्तस्य, इति व्याश्रयत्वात् णत्वस्यैवाप्राप्तिः । अत एव ''माषकुम्भवापेन' इत्यत्र षष्ठीतत्पुरुषोत्तरपदके तस्मिन् 'कुमति च' इति नित्यणत्वेन भाव्यम्; तत्पूर्वपदके तत्र तु 'प्रातिपदिकान्त' इति वाणत्वेन'' इति 'कुमति च' इति सूत्र*भाष्यं* सङ्गच्छते । अन्यथा वाणत्वापवादकेन नित्यणत्वेनैव कल्पद्वयेऽपि भाव्यम्; इति तदसङ्गतिः स्पष्टैव, इति ।

**अत्र गुरुचरणाः**—लिङ्गविशिष्टपरिभाषया तत्प्रकृतौ समासत्वस्य सत्त्वात् तथाश्रयणेऽपि णत्वं भवत्येवेति । इत्थं हि तदाकूतम्:—सामान्यतो विशेषतो वा तद्ग्रहणे सति लिङ्गबोधकप्रत्ययविशिष्टस्य तेन ग्रहणं बोध्यम् । ........ —भाप्र. २२-२३

३. करणे घञो दुर्लभत्वात्, ल्युटा बाधात् । न च घः, असंज्ञात्वात् । 'प्रायेण संज्ञायाम्' इति व्याख्यानस्य क्लिष्टत्वात् । —प्रौम. २०; २-३

यदपि 'अकर्तरि' इति सूत्रे 'संज्ञायाम्' इत्युक्तत्वेन घञोऽप्राप्तौ ल्युटा बाधात्, इति न युक्तम्; इति । तदपि न । 'असंज्ञायाम्' इति पदच्छेदात् । अव्याप्तिः प्रत्याख्यानं चोभयोः समानम् । —शर. २२; १७-१९

**घञ इति ।** 'अकर्तरि च' इत्यत्र 'संज्ञायाम्' इत्यस्य प्रायिकत्वात् तत्प्राप्तिः, इति भावः । —लशर. ४०

**प्रायिकत्वादिति ।** अत एव 'को भवता दायो लब्धः' इत्यादि सिद्धम् । स्पष्टं चेदं तत्रैव *भाष्ये* । एतेन ''तत्खण्डनाय 'असंज्ञायाम्' इति च्छेदः । अव्याप्तिप्रत्याख्याने चोभयोस्तुल्ये'' इति *मान्योक्तं* प्राचामनुरोधेन, इति ध्वनितम् । *भाष्यविरोधात्*, इति भावः । —भाप्र. ५०

४. 'प्रायेण संज्ञायाम्' इति व्याख्यानस्य **क्लिष्टत्वात्** । —*प्रौम*. २०; ३

**क्लिष्टत्वादिति** । व्यवहितान्वयात्, इति भावः । —*शर*. २०; १७

**क्लिष्टत्वादिति** । गुणप्रधानसन्निधौ प्रधानस्य विशेषणे साकाङ्क्षत्वे इतरान्वयस्तस्यायुक्तः, इति क्लेश इति भावस्तदाहः—न हीत्यादिना । —*लशर*. ४१

**क्लिष्टत्वादिति** । यत्तु 'व्यवहितान्वयात् तत्त्वम्' इति *मान्याः*; तत् प्राचामनुरोधेन । तस्यापि बहुषु दर्शनात् । यथाश्रुते तत्त्वेऽपि कल्प्यासन्नवाक्ये तत्त्वाभावाच्च । गुणस्य विशेषणसम्बन्धादृष्टेस्तत्त्वम्; इत्यपि न । 'गुणः कृतात्म' इति न्यायेन तस्यापि तद्दर्शनात् । तदेतत् ध्वनयितुमन्त्यरीत्यैव स्थलविशेषाशयेन तत्त्वमाहः—**गुणेति** ।

—*भाप्र*. ४१

५. धात्वादिषु करणव्युत्पत्तिः, आगमादिषु न; इति वैषम्यस्य दुरुपपादत्वाच्च ।

—*प्रौम*. २५; १-२

**दुरुपपादत्वादिति** । उपदेशशब्दस्य सकृदुच्चरितत्वात् । अन्यतरव्युत्पत्त्या सर्वत्र निर्वाहाच्च । —*शर*. २५; १८-१९

**वैषम्येति** । *भाष्य*रीत्या करणव्युत्पत्त्यैव सर्वसङ्ग्रहात्, इति भावः । —*लशर*. ४८

किञ्च कर्मव्युत्पत्त्यङ्गीकारस्य अफलत्वात्; तद् ध्वनयन्नाहः—**भाष्यरीत्येति** । धात्वादिवदागमादिभिरपि प्रयोग उपदिश्यते; इति भावः । एतेन 'उपदेशशब्दस्य सकृदुच्चरितत्वात्, अन्यतरव्युत्पत्त्या सर्वत्र निर्वाहाच्च दुरुपपादत्वम्' इति *मान्यो*क्तिः प्राचामनुरोधेन, इति ध्वनितम् । *भाष्य*विरोधापत्तेः । —*भाप्र*. ४८

६. **ऊकालोऽच्**—( १।२।२७ ) । 'ह्रस्वदीर्घप्लुतः' इति समाहारद्वन्द्वः । सौत्रं पुंस्त्वम् । —*प्रौम*. ३०; १-२

वस्तुतस्तु 'सौत्रं पुंस्त्वम्' 'सौत्रमेकवचनम्' इत्यनयोर्न कश्चिद् विशेषः; इत्याहुः । —*शर*. ३०; १५

**सौत्रं पुंस्त्वमिति** । यद्यपि इतरेतरयोगेऽपि सौत्रमेकवचनं वक्तुं शक्यम्; तथापि 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति तत्र तत्र *वार्त्तिको*क्तेर्लिङ्गस्य लौकिकत्वात् तद्व्यत्ययकल्पनमेवोचितम्; न तु शास्त्रीयवचनव्यत्ययकल्पनम्; इति भावः ।

—*लशर*. ५८

यत्तु पुंस्त्वैकवचनयोः सौत्रत्वे न विशेषः, इति *मान्याः*; तत् प्राचामनुरोधेन, इति ध्वनयन्नाहः—**यद्यपीति** । *–भाप्र.* ५८

**७. तस्यादित उदात्तमर्धह्रस्वम्** ( १।२।३२ ) । ह्रस्वग्रहणमतन्त्रम् । *–सिकौ.* ५८

**अतन्त्रमिति** । 'उपेयिवान्' इत्यत्र 'उपसर्ग' इव **अविवक्षित**मित्यर्थः । *–प्रौम.* ३३; १-२

**अविवक्षितमिति** । अनुत्यानुवादः, इत्यर्थः । तथा च दीर्घप्लुतयोरप्यर्धोदात्तबोधकम् । अर्धशब्दो न समांशवाची, अपि तु लेशवाची । लेशस्तु 'विभाषा च्छन्दसि' इत्यनेन विहितानामेकश्रुत्यादीनां तत्तत्प्रातिशाख्यानुरोधेन व्यवस्थावत् कस्याञ्चित् शाखायां समांशः, कस्याञ्चित् शाखायामर्धमात्रा, इति व्यवस्थापनीयम् । अत एव 'अर्धग्रहणं व्यर्थम्, समं स्यादश्रुतत्वात्' इति परास्तम् । –शर. ३३; ७-११

**अविवक्षितमित्यर्थ** इति । इदं च वक्ष्यमाणं *प्रातिशाख्यं* यच्छाखायां तच्छाखास्थवैदिकोदाहरणविषयम् । –लशर. ५९

**विषयमिति** । विषयकमित्यर्थः । एवञ्च अस्यार्थादिकथनस्य विशेषविषयत्वेऽप्यन्यत्र मूलकृतोऽपि तथैवेष्टम् । अत एव परममूले 'अतन्त्रम्' इत्येवोक्तम् । तस्य च तत्पदयुक्तग्रहणं स्वशास्त्रे सङ्केतितरूपेणाबोधकम्; किन्त्वर्धमात्रामात्रबोधकम्; इत्यर्थः । एवञ्च तदुक्तदोषो न, इति भावः ।

**मान्यास्तु**—अविवक्षितमिति अनुत्यानुवादः, इत्यर्थः । एवञ्च दीर्घप्लुतयोरप्यर्धोदात्तबोधकम् । अर्धशब्दो न समांशवाची, किन्त्ववयववाची । स च क्वचिद् वेदे समांशः, क्वचिद् वेदे अर्धमात्रा तत्त*त्प्रातिशाख्या*नुरोधेनेति, लोके सर्वत्र *भाष्य*प्रामाण्यात् अर्धमात्रैव, इति च व्यवस्था बोध्या । एवञ्च 'ह्रस्वग्रहणमतन्त्रम्' इति यथाश्रुतमेव, इत्याहुः ।

उभयथाऽपि 'समं स्यादश्रुतत्वात्, इत्येव सिद्धे अर्धग्रहणमपि व्यर्थम्' इत्यपास्तम् । *–भाप्र.* ५९-६०

८. प्रथमान्तेन परिनिष्ठितविभक्त्या वा विग्रहः, इति सिद्धान्तात् ।

—*प्रौम.* ४७; २-३

**परिनिष्ठितेति** । स्पष्टं चेदम् 'अनेकमन्यपदार्थे' 'तत्पुरुषे तुल्यार्थ' इत्यादि-सूत्रे *भाष्यादौ* । अत एव 'पूरणगुण' इति समानाधिकरणेन षष्ठीसमासनिषेधोऽपि सङ्गच्छते ।

—*शर.* ४८; १९-१०

**परिनिष्ठितेति** । अत्र च 'एकविभक्ति चापूर्वनिपाते' इति ज्ञापकम् ।

—*लशर.* ८०

**परिनिष्ठितेति** । यत्तु "अत्र 'पूरण' इत्यत्रत्य-'समानाधिकरणेन' इति ज्ञापकम्" इति *मान्याः*; तत् प्राचामनुरोधेन । तत्प्रत्याख्यानस्य तत्रैव *भाष्ये* ध्वनितत्वात्, उक्त*भाष्य*विरोधाच्च । अत आहः—**अत्र चेति** ।

—*भाप्र.* ८०

९. **यणादिकमिति** । शीतलशब्दे सवर्णदीर्घ आदिशब्दार्थः ।

—*प्रौम.* ४९; ३

**शीतलशब्दे** इति शकारस्य ईकारे परतः सवर्णदीर्घो न; शीङ्शप्प्रभृतिषु शकारोच्चारणवैयर्थ्यापत्तेः । अत एव 'डउ'प्रत्ययेऽपि सन्धिर्न, इति सिद्धान्तः ।

—*शर.* ४९; १४-१५

**शीतलशब्दे** इति । शस्य ईकारे परे, 'दधि' इतीकारस्य शकारे परे च, इत्यर्थः । न च शीङः शकारोच्चारणेन तच्छकारस्य ईकारे न दीर्घः, इति वाच्यम् । शीतलशब्दे शीङोऽभावात् । किन्तु श्याधातोः क्ते 'द्रवमूर्तिस्पर्शयोः श्यः' इत्यनेन सम्प्रसारणे 'श्योऽस्पर्शे' इत्युक्तेर्नत्वाभावे च निष्पन्नात् शीतशब्दात् 'सिध्मादित्वात्' लचि शीतलशब्दः, इत्यदोषात् ।

—*लशर.* ८२

यत्तु *मान्याः*, शस्य ईकारादौ परे सवर्णदीर्घादि दधि इत्यस्यैव, न शीङ्शयादिषु, शकारोच्चारणवैयर्थ्यापत्त्या अखण्डेऽचूकार्याप्रवृत्तिबोधनात् । अत एव 'तितउ'शब्दे गुणो न । तस्मात् शीतलशब्दे परे दधीत्यस्य सवर्णदीर्घ आदिशब्दार्थः । अत एव मूलं परममूलं च स्वरसतः सङ्गच्छते इति; तत् प्राचामनुरोधेन, इति तद् ध्वनयन्नाहः—**शस्येति** । सूत्राभावे ह्रस्वेकारशकारयोः सावर्ण्यात् शस्याक्त्वेन दीर्घप्राप्तिः, सूत्रसत्वे तु तयोस्तन्निषेधेन शस्यानक्त्वात्तत्प्राप्तिरिति भावः । तस्याः प्राचामनुरोधितां ध्वनयितुं शङ्कते—**न चेति** ।

—*भाप्र.* ८२

१०. तच्छेषपक्षं दूषयित्वा पदोपस्थितिपक्षस्यैव *भाष्ये* समर्थितत्वात्;. इत्याहुः।
—प्रौम. ६६-९, ६७-१

**तच्छेषेति**। यद्यपि नियमपक्षो न तच्छेषपक्षः, इति स्फुटमेव; तथापि तच्छेषपक्षदूषणदूषितत्वमस्त्येव। —शर. ६६; २१-२२

एवञ्च 'मिदेर्गुणः' इत्यादौ परस्परविरोधादनयोस्त्यागे सर्वादेशेगुणापत्त्या तद्विरोधः, इति भावः; तदाहः—**तच्छेषपक्षमिति**। —लशर. १०२-१०३

एतेन 'यद्यपि नियमपक्षो न तच्छेषपक्षः, इति स्फुटमेव। तथापि तच्छेषपक्षदूषणदूषितत्वमस्त्येव' इति *मान्यो*क्तिर्यथाश्रुतार्थाभिप्राया; इति ध्वनितम्। तद् ध्वनयन्नाहः—**एवञ्चेति**। —*भाप्र*. १०२

११. तेन 'त्रपूणि' इत्यादावङ्गस्य नान्तत्वेन दीर्घः सिद्धः। —प्रौम. ७०; १

किञ्च, अन्तरङ्गत्वात् नुमः पूर्वं स्वरस्य प्रवृत्तेः अकृतव्यूहपरिभाषा तु न प्रवर्तते। —शर. ७०, १३-१४

**दीर्घः सिद्ध** इति। तच्छब्देन यस्य विहितः स समुदायः परामृश्यते, इति भावः। यद्यपि तस्यान्त्याचः इति व्याख्यानेऽपि 'भविता' इत्यादौ तासवयवेटो लघूपधाङ्गावयवत्वेन प्राप्तस्य गुणस्य 'दीधीवेवीटाम्' इति निषेधारम्भेण लोकव्यवहारेण च अवयवावयवस्य समुदायावयवत्वाङ्गीकारात् अत्र न दोषः, तथापि तथा न व्याख्यातम्, 'पञ्चारत्नीनि' इत्यादौ पदस्य विभज्यान्वाख्याने उत्तरपदस्यापि नान्तत्वापत्तौ 'इगन्त' इति स्वरानापत्तेः; इति स्पष्टं *भाष्यादौ*। —लशर. १०६-१०७

**इगन्तेतीति**। द्विगौ एतेषु परेषु सङ्ख्यावाचि पूर्वपदं प्रकृत्या, इत्यर्थक-'इगन्तकाल' इति सूत्रविहितद्विगुस्वरेत्यर्थः।- किञ्च वर्णस्य वर्णान्तरावयवत्वासम्भवात्। एतेन अन्तरङ्गत्वात् प्राक् स्वरप्रवृत्त्या तत्पक्षेऽपि न दोषः, इति *मान्यो*क्तिः प्राचामनुरोधेन, इति ध्वनितम्। —*भाप्र*. १०७

१२. **अनेकविधमिति**। स्थानार्थगुणप्रमाणकृतमित्यर्थः। —प्रौम. ७१; १

यत्तु *भाष्ये* 'अनान्तर्यमेव आन्तर्यम्' इत्युक्तम्; यच्च व्याख्यातृभिः "चतुर्विधमान्तर्यम् इत्यत्र न मानमस्ति। प्रत्युत 'सोष्मणः सोष्माणः' इति *भाष्यात्* 'ऐचोश्चोत्तरभूयस्त्वात्' इति *भाष्याच्च* अनियम एव लभ्यते" इत्युक्तम्; तत्सर्वम् 'उरण् रपरः' इति सूत्रेण प्रसङ्गावस्थायामेव रपरत्वस्य विधानात्, 'सोष्मणः' इति *भाष्येण* गुण-

कृतान्तर्यस्य, 'ऐचोश्चोत्तरभूयस्त्वात्' इति *भाष्येण* स्थानकृतान्तर्यस्य चोपपादितत्वाच्चोपेक्ष्यम्। शर. ७१-७२

**गुणप्रमाणेति** । प्रमाणस्य ह्रस्वत्वादेर्गुणत्वेऽपि ब्राह्मणवसिष्ठन्यायेन पृथगुक्तिः । गुणशब्देनोक्तत्रितयातिरिक्तधर्ममात्रम् । तेन 'अनान्तर्यमेव एतयोरान्तर्यम्' इत्यादि स्थानेऽन्तरतमसूत्रस्थ*भाष्येण* न विरोधः । —लशर. १०८-१०९

ननु स्थानेत्यादि परिगणनमयुक्तम् । तदन्यानान्तर्यरूपान्तर्यस्य 'स्थानेऽन्तर' इति सूत्रे *भाष्ये* उक्तत्वात् । यद्यपि प्रसङ्गावस्थायामेव रपरत्वविधानात् न तस्योपयोगः; तथापि पक्षान्तरे उपयोग एव, इत्यत आहः—**गुणेति** ।

**नोक्तेति** । ( गुणशब्देनोक्त° ) । अन्यथा तद्ग्रहणानर्थक्यम्; इति भावः ।

**धर्ममात्रमिति** । न तु विजातीययत्न एव इति भावः । आदिना तत्रत्यस्य 'सोष्मणः सोष्माणः' इत्यादेः सङ्ग्रहः । एतेन 'अनान्तर्यमेव' इति प्रतीकं धृत्वा "न हि चतुर्विधमेवान्तर्यं परिभाषितम्, रूपान्तरेणापि सादृश्यसम्भवात्, 'पाददन्त' इत्यादौ स्थान्यादेशभावमते वर्णसाम्यकृतसादृश्यस्य परिग्रहाच्च, इति *कैयटोक्तिः*, उपायान्तरपरा; इति ध्वनितम् । अत एव तद्*भाष्यं कैयटश्च* चिन्त्य एव । प्रसङ्गावस्थायामेव रपरत्वविधानात्, सोष्मणः इत्यनेन गुणकृतान्तर्यस्य, 'ऐचोश्चोत्तरभूयस्त्वात्' इत्यनेन स्थानकृतान्तर्यस्य च विवक्षितत्वाच्च" इति *मान्योक्तिः* प्राचामनुरोधेन, इति बोध्यम् । पक्षान्तरे तस्यावश्यकत्वात्, 'पाददन्त' इत्यादावनिर्वाहाच्च, इति दिक् । —*भाप्र.* १०९

१३. तत्र हि 'डाणलोरिवानुपूर्व्यात् अनेकाल्त्वेनैव सर्वादेशत्वम्' इति सिद्धान्तः । —*प्रौम.* ८०; १

**डाणलोरिवेति** । आदेशस्य प्रत्ययाधिकारे पाठेऽपि षष्ठीनिर्देशात् स्थानिसम्बन्धलाभेन निराकाङ्क्षत्वेन 'परश्च' इत्यस्यानुपस्थितौ तत्सहचरितत्वात्, संज्ञानपेक्षणाच्च 'प्रत्ययः' इत्यस्याप्यनुपस्थितौ, औपदेशिकप्रत्ययत्वाभावः । न चैवं भ्रमोऽपि तत्र स्यात्, इति वाच्यम् । 'तृणह इम्' इति निर्देशेन तत्रैव तत्स्वीकारात् ।

—शर. ८०; ९-१२

**डाणलोरिवेति** । आदेशानां प्रत्ययाधिकारे पाठेऽपि वाक्यार्थबोधोत्तरमेव प्रत्ययत्वज्ञानेन, उपदेशे णकारे इत्त्वाप्रवृत्तेस्तदुत्तरं लक्ष्ये प्रवृत्तिकाले इत्त्वेऽपि, अनेकाल्त्वाक्षतेः; इति भावः । —लशर. ११७-११८

ननु णलः प्रत्ययाधिकारपाठेन तत्र मूलकृदिष्टानुपूर्व्यनुपयोगेन दृष्टान्तासङ्गतिः; अत आह:—**आदेशेति** । प्रत्ययादेशानां सिजादीनामित्यर्थः । आगमविकारप्रकृत्यादेशानां सिजादीनामित्यर्थः । आगमविकारप्रकृत्यादेशानां तु तत्त्वेऽपि यथा सा न, तथाऽन्यत्र स्पष्टम् । अतः किमु वक्तव्यम् तद्बाह्यडादीनां तथा; इति 'अपि'-शब्दार्थः ।

*मान्यास्तु*:—तत्त्वेऽपि षष्ठीबलात्, देशांशे नैराकाङ्क्ष्यात् 'परश्च' इत्यस्यानुपस्थितौ तत्सहचरितस्य 'प्रत्ययः' इत्यस्याप्यनुपस्थितेः तदुपयोगः; इत्याहुः । तत् प्राचामनुरोधेन । श्नमादौ दोषापत्तेः । इत्संज्ञार्थं तस्यावश्यकत्वात् ज्ञापकाश्रयणे गौरवाच्च । एतद् ध्वनयन्नाह:—**वाक्यार्थेति** । —*भाप्र*. ११७

१४. **अकृतव्यूहा** इति । यद्यपि 'कृतमपि कार्यं निवर्तयन्ति' इति परिभाषान्तरं पठ्यते, फलं च तुल्यम्; तथापि 'अकृत' इत्येव लघु ।

'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।'

इति न्यायात्, इति भावः ।

**न कुर्वन्तीति** । यथा 'निषेदुषीम्' इत्यादौ क्वसोः इटम् अन्तरङ्गत्वात् प्राप्तमपि भाविना सम्प्रसारणेन वलादित्वं नङ्क्ष्यति, इत्यालोच्य न कुर्वन्ति, इत्यर्थः ।

—*प्रौम*. ८३-८४

**अकृतेत्येवेति** । अत्र च ज्ञापकम् 'चौ' इति सूत्रम्, 'गोरतद्धितलुकि' इति सूत्रे तद्धितग्रहणं च । तद्धि 'राजगवीयति' इत्यादौ टच् यथा स्यात् । उक्तपरिभाषाया अभावे अन्तरङ्गत्वात् टच्सिद्धौ किं तेन? 'अदो जग्धिर्ल्यप्ति' इति सूत्रस्थल्यब्ग्रहणमपि मानम् । 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते' इत्यादिवचनानाम् उक्तवचने एवान्तर्भावः । स्पष्टं चेदं 'समर्थानां प्रथमाद्वा' इति सूत्रे *भाष्ये* । —*शर*. ८३; १५-१९

**न कुर्वन्तीत्यर्थ** इति । यदि तु 'सेदुषः' इत्यादौ पदावधिकेऽन्वाख्याने 'सेद् वस् अस्' इति स्थिते, इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वेन शीघ्रोपस्थितिकत्वात् पूर्वं सम्प्रसारणे, वलादित्वाभावात् इटः प्राप्तिरेव न; लक्ष्यानुरोधाच्चात्र पदावधिकमेवान्वाख्यानम्, इति तत्सिद्धिः; इत्युच्यते; तदैषा परिभाषा निष्फला, इति बोध्यम् । अत एव एषा *भाष्ये* न क्वापि व्यवहृता, इत्यन्यत्र विस्तरेण निरूपितम् ।

—*लशर*. १२२-१२४

ननु एतत्फलान्यथासिद्धावपि फलान्तरसत्त्वात् अनेकज्ञापकसत्त्वाच्च कथं तत्त्वम्; अत आह:—**अत एवेति** । एवं रीत्या फलान्तराणामप्यन्यथासिद्ध्या निष्फलत्वादेव; इत्यर्थः । ज्ञापकानान्तु अन्तरङ्गपरिभाषानित्यत्वज्ञापकतैव; इति निर्मूलत्वमेव, इति भावः; तदाह:—**अन्यत्रेति** । *परिभाषेन्दुशेखरे*, इत्यर्थः । —*भाप्र*. १२३-१२४

१५. सिचूक्सचङ्ङादीनां श्आदेशस्य शानचश्चासङ्ग्रहापत्तेः ।

—प्रौम. ९२-९३

**सिजिति** । प्रयोजनं तु प्रत्ययत्वादिलाभः । न चाधिकारात् तत्सिद्धिः ? उक्तोत्तरत्वात् । आदिना त्वीटो ग्रहणम् । —शर. ९२-२०; ९३-३

**चङ्ङादीनामिति** । आदिना ञिण् । न केवलं च्लयादेशानामेव असङ्ग्रहः; इत्याहः—**श्आदेशस्येति** । तदभावे हि अवादिषाताम् इत्यत्र इड् न स्यात् । क्सादेः कादीनामित्त्वं न स्यात् । शानचः शस्य च तन्न स्यात् । ........

ननु सिजादीनां प्रत्ययाधिकारे पाठात् श्नम्वत् प्रत्ययत्वमस्ति, इति न स्थानिवत्त्वोपयोगः । ........ —लशर. १४३-१४४

एतेन 'आदिना त्वीटो ग्रहणम्' इति *मान्यो*क्तिः प्राचामनुरोधेन; इति सूचितम् । अत आहः—**आदिनेति** । —*भाप्र.* १४३

**पाठादिति** । एतेन 'न चाधिकारात् तत्सिद्धिः; उक्तोत्तरत्वात्' इति *मान्यो*क्तिः प्राचामनुरोधेन, इति ध्वनितम् । अत एव दृष्टान्तमाहः—**श्नम्वदिति** । —*भाप्र.* १४४

१६. अलो विधौ :—धुकामः । —प्रौम. ९५; ५

नन्वेवमपि वत्वस्य हल्त्वाद्यपेक्षया विशेषधर्मत्वेन अतिदेशाप्राप्तिः । 'सामान्यातिदेशे विशेषानतिदेशः' इति सिद्धान्तात् । अत एव 'ब्राह्मणवत् अस्मिन् क्षत्रिये वर्तितव्यम्' इत्युक्ते माठरादिविशेषकार्यं नातिदिश्यते । अत एव च 'आशंसायां भूतवच्च' इति सूत्रे भूतसामान्ये विहितयोर्लुङ्निष्ठयोरेवातिदेशः, न तु भूतविशेषविहितयोर्लङ्लिटोरपि; इति सिद्धान्तः ।

नन्वयं सिद्धान्तः, उपस्थितसामान्यधर्मैस्तदाक्षिप्तव्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति, अनुपस्थितस्य विशेषस्य ग्रहणे प्रमाणाभावः, इति तर्कमूलकः । 'स्थानिवदादेशः' इत्यत्र तु स्थानित्वधर्मोपस्थितिः । न च तन्निमित्तकार्यमस्ति । तथा च अतिदेशसामर्थ्यात् अन्येषां ग्रहणे विनिगमकाभावात् सर्वेषां ग्रहणम्; इति दृष्टान्तदार्ष्टान्तिकयोर्महद् वैषम्यम् । —शर. ९६; १६-२२ ९७; १-२

**धुकाम** इति । यद्यपि वत्वं हल्त्वाद्यपेक्षया विशेषधर्मः, तथापि एतद्वाक्योपप्लुते 'वकारवत् उकारः' इति वाक्ये उपात्तधर्मापेक्षया न तस्य तत्त्वम् । सूत्रक्लृप्तस्थान्यादेशभावमादायैव एतत्कृतवाक्योपप्लवात्; इति भावः । —लशर. १५१-१५२

**अत्र मान्यादयः**—उक्तन्यायस्य उपस्थितसामान्यधर्मैस्तदाक्षिप्तव्यापकधर्मैश्च विध्याकाङ्क्षापूरणे मानाभावः, इति तर्कमूलकतया दृष्टान्ते तथा सम्भवेऽपि, अत्र स्थानित्वधर्मोपस्थित्या तन्निमित्तकार्याभावेन अतिदेशसामर्थ्यात् अन्येषां ग्रहणावश्यकत्वे विनिगमकाभावात् सर्वेषां ग्रहणम्; इति तयोर्महत् वैषम्यम्, इति समादधुः; तत् प्राचामनुरोधेन। 'स्थानिवदादेशः' इत्यस्य सङ्ग्राहकवाक्यत्वेन लक्ष्यासंस्कारकत्वात् तद्धर्मस्योपस्थितस्यापि निष्फलत्वेन सूत्रवैयर्थ्यापत्त्या तत्संस्कारकवाक्यान्तरकल्पनावश्यकत्वात्। तद् ध्वनयन् तथैव समाधत्ते:—**तथाप्येतदिति**। **उपप्लुते**, कल्पिते आविर्भूते वा। —*भाप्र*. १५२

१७. न च प्रत्ययलक्षणम्। वर्णाश्रयत्वात्, इति भावः। —*प्रौम*. ११७; २-३

यद्यपि *वार्तिककृन्मते* अप्राधान्येनालाश्रयणे प्रत्ययलक्षणार्थं प्रत्ययलक्षणसूत्रम्; तथापि *भाष्यकृन्मते* प्रत्ययलक्षणसूत्रं नियमार्थम्; इत्यभिप्रायेणोक्तम्। —*शर*. ११९; १५-१६

प्रत्ययलक्षणसूत्रं तु *भाष्यकृता* 'प्रत्ययस्य यत्र असाधारणं रूपमाश्रीयते; तत्रैव प्रत्ययलक्षणम्' इति नियमार्थत्वेन स्थापितम्, न तु अप्राधान्येन अलाश्रयणे विध्यर्थम्, इति भावः। —*लशर*. १६५-१६६

**असाधारणमिति**। तन्मात्रवृत्तीत्यर्थः। एवञ्च 'सुदत्प्रासादः' इत्यादौ दीर्घत्वमिव अत्र भत्वमतिदेष्टुमशक्यम्। 'वृषण्वस्वश्वयोः' इत्यनेन अन्यत्रापि विधानात्। एतेन '*वार्तिकमते* यद्यप्युत्तराविषयतया तत्प्राप्तिरेव, तथापि *भाष्याभिप्रायेण* इत्युक्तम्' इति *मान्योक्तिः* प्राचामनुरोधेन, इति ध्वनितम्। नियमशास्त्राणां विधिमुखेनैव प्रवृत्त्या यथाश्रुतमूलसौष्ठवे भङ्क्त्वा व्याख्यानमयुक्तमित्यपास्तं च। तत्पक्षे उक्तरीत्या तदप्राप्त्या 'वर्णाश्रयत्वात्' इत्युत्तरासङ्गतेः। अज्ञानेन शङ्कायामपि 'नियमार्थत्वात्' इत्युत्तरौचित्याच्च, यथाश्रुतमूलासङ्गतेरुक्तत्वाच्च; इति दिक्। —*भाप्र*. १६५

१८. जशि:—**सग्धिश्च मे**। अदनं ग्धिः। अदेः क्तिनि 'बहुलं छन्दसि' इति घस्लादेशः। 'घसिभसोर्हलि' इत्युपधालोपः। 'झलो झलि' इति सलोपः। धत्वम्। घस्य जश्त्वम्। 'सहस्य सः' इति सूत्रात् 'सः' इत्यनुवर्तमाने 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' इति सूत्रेण सः। —*प्रौम*. १२७; १-५

**बहुलं छन्दसीति ।** सादेशोपधालोपार्थं छान्दसत्वस्यावश्यकत्वादेवमुक्तम् । प्रकृतरूपस्य धात्वन्तरादपि सिद्धेः ।

**समानस्येति ।**

'सग्धिः स्त्री सहभोजनम्'

*इत्यमरकोशा*त्तु सहार्थः प्रतीयते । 'छान्दसा अपि क्वचित् भाषायां भवन्ति' इत्याश्रित्य समर्थनीयम् । केचित्तु 'पृषोदरादि'पाठात् उपधालोपमिच्छन्ति

—*शर*. १२७; १२-१३

**सूत्रेण स इति ।**

'सग्धिः स्त्री सहभोजनम्'

*इत्यमरात्* 'सहस्य सादेशः' इति प्रतीयते । 'झलो झलि' इति सिच एव लोपः, इति पक्षे छान्दसो वर्णलोपो बोध्यः । स्पष्टं चेदं 'घि च' इति सूत्रे *भाष्ये* । लोके तु 'सग्धि' इत्यसाध्वेवेति बोध्यम् । —*लशर*. १७६

ननु *अमर*प्रामाण्यात् स्वतन्त्रधातोरेव बाहुलकात् क्तिनि, पृषोदरादित्वात् सलोपे लोकेऽपि साधुः, इति चेत्; न । तत्पक्षे 'सग्धिः' इत्यस्यासिद्धिमाशङ्क्य 'नैतत् घसेः रूपम्, किन्तु सघेः' इति समाधाय 'छान्दसो वर्णलोपो वा' इत्यन्यसमाध्युक्तिपर*भाष्य*प्रामाण्येन लोकेऽनभिधानप्रतीतेः । तदाहः—**स्पष्टमिति ।** अत एवाहः—**लोके त्विति ।** —*भाप्र*. १७७

१९. गिरिवेश्मयतेस्तु क्विपि 'गिरिवेट्' इत्युचितम् । प्रत्याख्यानपक्षे तु 'मान्तमेव' इति दिक् । —*प्रौमश*. १३२; १-२

**मान्तमेवेति ।** यत्तु अनेकपक्षानुरोधेन 'गिरिवेट्' इत्येवोचितम्; चरमपक्षे 'बह्वपेक्षं बहिरङ्गम्' इत्यस्याश्रयणे प्रातिपदिकात् णिजुत्पत्तौ मलोपस्य सुलभत्वात्, इति; तन्न । झल्ग्रहणापकर्षपक्षफलैवयार्थं 'पूर्वं पूर्वमन्तरङ्गम्' इत्याद्यर्थस्याप्याश्रयणेन चरमपक्षेऽपि मान्तप्रयोगस्य सत्त्वेन, अनेकपक्षानुगुण्यस्यात्र अविशिष्टत्वात् । क्लृप्ता चेत्थं व्यवस्था आद्ययोः पक्षयोः फलैक्ये ।

एतेन चरमपक्षस्य प्राबल्यानुमानात् **'अमान्तमेव उचितम्'** इत्यपास्तम् । हेत्वनुपन्यासाच्च । न च चरमग्रन्थोपन्यासो हेतुः । अप्रयोजकत्वात् । मानान्तरेण सिद्धप्राबल्यकस्य उत्सर्गतश्चरमग्रन्थे उपन्यासः ।

[अत्र प्रकरणसन्दर्भार्थं १३२, १३३, १३४ पृष्ठानि सम्पूर्णानि द्रष्टव्यानि।]

—शर. १३२; ७-१४

**मान्तमेवेति।** 'अस्य प्राप्नोति' इति शेषः। तस्मात् तत्पक्षेऽपि वाक्यभेदेन व्याख्याय 'गिरिवेट्' इत्येव। अन्यथा आरम्भप्रत्याख्यानयोः फलभेदः स्यात्; इति भावः।

—लशर. १८४

[अत्र प्रत्याख्यानपक्षे *प्रौढमनोरमा–शब्दरत्नयोः* मते मान्तमेव रूपम्। लघुशब्द-रत्नमते तु प्रत्याख्यानपक्षेऽपि 'गिरिवेट्' इति अमान्तमेव, इति स्पष्टमत्र मतभेद-स्वरूपम्।]

२०. किञ्चैवं सति 'सर्वस्य द्वे' इति द्वित्वमपि पुनः पुनः प्रवर्तेत।

—प्रौम. १४५; १

'इरयोः' इति द्विवचनं तु लाक्षणिकस्यापि रेभावार्थम्। तदेतत् सकलमभि-सन्धायाहः—**किञ्चैवं सतीत्यादि।**

—शर१४५; ८-१०

'इरयो रे' इति सूत्रे 'इरयोः' इति द्विवचनं तु स्वविधेयस्य स्वस्मिन्नुद्देश्यत्वा-प्राप्त्या तत्प्राप्तये; इति न तदस्यां मानम्।

—लशर. १९४-१९५

........किञ्च अभेदे उद्देश्यत्वविधेयत्वयोर्बाधस्य जगत्प्रसिद्धत्वेन, भेदे एव तयोः सम्भवेन, तदवच्छेदकयोर्भेदस्य अर्थादेव सिद्धत्वेन संज्ञासंज्ञिभावस्थले तथा सत्त्वेन च 'कारके' इति सूत्रोक्तरीत्या किमपूर्वमुक्तम्? न हि *गुरुचरणै*स्तदवच्छेदकयोरभेदे उद्दे-श्यत्वविधेयत्वे उक्ते। किन्तु उद्देश्यत्वं विधेयत्वं च मिथो विरुद्धम्, भेदे तत्सम्भवात्, इत्युक्तम्। ........ तदेतत् सर्वमभिप्रेत्य 'स्वविधेयस्य स्वोद्देश्यत्वाप्राप्त्या' इत्येवोक्तम्; इति दिक्।

'लाक्षणिकत्वात् सागमेन स्यात्, अतो द्विवचनमुपक्षीणम्; इत्यज्ञापकम्' इति *मान्याः*।

—भाप्र. १९५

२१. यत्तु 'श्लोकवार्त्तिकमिदम्' इत्याहुः, तद् रभसात्।

—प्रौम. १७८; १-२

**श्लोकेति।** यत्तु 'वृत्तौ भवम्, वार्त्तिकम्' इत्याहुः, तन्न। *भाष्य*पदस्य अनन्व-यापत्तेः। वार्त्तिकशब्दस्य यौगिकत्वेन पूर्वनिपातापत्तेश्च। —शर. १७८; १६-१७

**वद् रभसादिति ।** वृत्तौ भत्रमिति व्याख्याने वार्त्तिकशब्दस्य पूर्वनिपातापत्तिरित्याहुः । —लशर. २३३

**आहुरिति ।** मूलानुयायिनो *मान्याः*, इत्यर्थः । तस्य यौगिकत्वात्, इति भावः । तत्प्रकरणस्य अनित्यत्वप्रत्याख्यानाभ्यां सुसाधमेवेदम्, इति अत्रारुचिः एतत्सूचिता बोध्या । —*भाप्र.* २३३

२२. प्रश्नस्य, 'दान्त' इत्युत्तरस्य च **निरालम्बनत्वात्** । —*प्रौम.* १८०; २

**निरालम्बनत्वादिति ।** प्रश्ने तत्त्वं तु सिद्धान्तदूषणातिरिक्तदूषणवत्त्वम् ; तच तदन्त्ये प्रवृत्त्या स्पष्टमेव । —शर. १८०; ७-८

**निरालम्बनत्वादिति ।** अद्ग्रहणं **तद्भिन्न**व्यावृत्त्यर्थम्, इत्यर्थस्य बालैरपि सुज्ञेयत्वेन, 'अतः किम्?' इति प्रश्नस्य 'दान्ते मा भूत्' 'वटक्, मरुत्, इत्यत्र च मा भूत्' इति उत्तरस्य च निरालम्बनत्वम्; इत्यर्थः । —लशर. २३५-२३६

अन्त्यव्यावृत्त्यर्थत्वं न, उक्तज्ञापकात्; अत आहः—

**तद्भिन्नेति ।** एतेन प्रश्ने तत्त्वं सिद्धान्तदोषान्यदोषवत्त्वम् । उत्तरे तत्वं तु उत्तरान्तरसहितत्वम् । तच अन्त्ये प्रवृत्त्या स्पष्टमेव; इति *मान्योक्तिः* प्राचामनुरोधेन, इति ध्वनितम् । —*भाप्र.* २३५-२३६

२३. **इन्द्रे च (६।१।१२४)** । आरम्भसामर्थ्यान्नित्यमिदम् । 'इन्द्रे च नित्यम्' इति पाठस्तु *भाष्यासम्मतत्वादुपेक्षितः* । —*प्रौम.* १९१; १-२

**इन्द्रे च । भाष्येति ।** यद्यपि क्वचिद् *भाष्य*पुस्तके 'इन्द्रे' इति सप्तम्यन्तमेव पठ्यते; तथापि तत्सूत्रैकदेशानुकरणपरतयैव व्याख्येयम् । 'खरि च' इत्यादावित्र अनुवृत्त्यर्थं 'च'शब्दस्यावश्यकत्वेन तत्सहितपाठ एव युक्तः । —शर. १९१; १२-१३

**भाष्यासम्मतत्वादिति ।** "इन्द्रे इति सामर्थ्यान्नित्यम्" इति तदुक्तेरिति भावः । —लशर. २४५

**इन्द्रे इतीति ।** एतेन मूलोक्तः स च पाठोऽप्युपेक्ष्यः, इति सूचितम् । '*भाष्ये* तथा पाठः सूत्रैकदेशानुवादी' इति *मान्योक्तिस्तु प्रक्रियाप्रकाशानुयायिनी* । यतः तैश्च अनुक्तसमुच्चयार्थात् 'गवाक्षः' इत्युक्तम् । सर्वथाऽनुपपन्नफलसत्त्वे तथोक्तिरुचिता । तत्फलस्य तु पूर्वसूत्रेणैव साधितत्वात् । अत एव व्यवस्थितविभाषासु 'गवाक्षः' इत्युक्तिर्भाष्ये; इति भावः । —*भाप्र.* २४५

२४. साहसं शास्त्रत्यागः । तद् अनिच्छताऽपि, शास्त्रमनुरुन्धानेनापि, इत्यर्थः; इति हरदत्तः —प्रौम. १९५; १-२

'प्राचाम्' इति न प्रकरणशेषभूतम् । किन्तु 'प्रत्यभिवादे' इत्यारभ्य 'गुरोरनृतः' इत्यन्तानामेव । तस्यैवोपस्थितत्वात् । अत एवात्रकरणं चरितार्थम् । अत एव च 'विभाषा पृष्टप्रतिवचने' इति सूत्रे विभाषाग्रहणं चरितार्थम् । ध्वनितश्चायमर्थः 'अपर आह' इत्युक्त्या अरुचिबोधनेन *भाष्यकारेण*; इत्याहुः । —शर. १९५; १५-१९

**हरदत्त इति** । *कैयटो*ऽप्येवम् अत्र पक्षे 'विभाषा पृष्ट' इत्यत्र विभाषाग्रहणम् अव्युत्पन्नानुवादः । 'अविद्वांसः प्रत्यभिवादे' इत्यादि पस्पशास्थं *भाष्य*मपि वैकल्पिकेषु भावानुष्ठानौचित्येन शास्त्राज्ञाननिन्दापरं बोध्यम् । —लशर. २४६

**अत्र मान्यादयः**—प्राचामिति विभक्तम् ........ । ध्वनितश्चायमर्थः, 'अपर आह' इत्युक्त्या अरुचिबोधनेन *भाष्यकारेण*, इति; तत् प्राचामनुरोधेन । परममूले *भाष्ये* च सर्वपदोक्त्यस्वारस्यापत्तेः । 'विभाषा पृष्ट' इत्यत्र *भाष्यकृत्*कृत'विभाषा' इति योगविभागेन सर्वप्लुतस्य वैकल्पिकत्वसाधनाच्च । तद् ध्वनयन्नाह:—**अत्र पक्ष इति** । अनेन *भाष्योक्तो*ऽप्यपरपक्षोऽस्ति, इति सूचितम् । ........ तदनुरोधेन अत्रापि पक्षे सर्वप्रकरणसम्बन्ध एवोचितः; इति भावः । —भाप्र. २४६

२५. **दूराद्धूते च (८।२।८४)** । हूतमाह्वानम्, तच्च सम्बोधनमात्रोपलक्षणम्, इत्यभिप्रेत्याह:—**दूरात् सम्बोधने** इति । —प्रौम. १९१; ९-१०

तच्च सम्बोधनं 'सम्बोधने च' इति शास्त्रव्युत्पादितमेव । तच्च अविशेषात् पित्रादिसङ्केतितदेवदत्तादिप्रकृतिकम्, पाचकशब्दादिप्रकृतिकं च । —शर. १९२; २

**पुत्र एहीति** । वाक्यस्थस्येत्यर्थः । अनुकरणे दूरात् सम्बोधकत्वाभावाच्च; इत्यपि बोध्यम् । —लशर. २४७

**बोधकत्वेति** । अयम्भावः— दूरादाह्वानं दूराद् बोधनस्योपलक्षणम्, न तु सम्बोधनविभक्तिनियामकस्य अभिमुखीकृत्यबोधनस्यैव । 'आगच्छतु भवान् देवदत्तः' इत्येवमाह्वानस्यापि सम्भवात् । अत एव 'आकडार'सूत्रे गुरुनदीसंज्ञयोः समावेशे 'वात्सीबन्धुः' इत्यत्र 'गुरोः' इति प्लुतः, 'नदी बन्धुनि' इति पूर्वपदान्तोदात्तत्वं च फलमुक्तं *भाष्ये* । अन्यथा तत्र तादृशसम्बोधनाभावेन 'गुरोः' इत्यस्याप्राप्त्या तदसङ्गतिः स्पष्टैव, इति ।

एतेन तच्च सम्बोधनं 'सम्बोधने च' इति शास्त्रव्युत्पादितमेव, इति *मान्योक्तिः* प्राचामनुरोधिनी ........ इति सूचितम् । —भाप्र. २४७

२६. सम्बुद्धौ किम्? अहो इति। अत्र परत्वात् विकल्पो मा भूत्।
—*प्रौम*. २१०; ३

'आकडारात्' इत्यस्य तु न प्रवृत्तिः। संज्ञाया एकत्वात्। —*शर*. २११; ५

संज्ञाया एकत्वात्, ज्ञापकस्य च विशेषापेक्षत्वेन संज्ञाभेदविषयत्वात्, इति भावः; इति केचित्। —*लशर*. २५३

**केचिदिति**। मूलानुयायिनो *मान्याः*; इत्यर्थः। अत्र अरुचिबीजं तु 'साक्षात्-प्रभृति' इति सूत्रस्थ*भाष्य*विरोधः। —*भाप्र*. २५३

२७. **अच्त्वादिति**। न चैवं 'हरिः कर्ता' 'हरिं स्मरेत्' इत्यादौ यणादि-प्रसङ्गः। त्रिपादीस्थेन विसर्गादीनामसिद्धत्वात्। —*प्रौम*. २३६; १-२

'हरिं जयति' इत्यादौ 'झलां जश् झशि' इति जश्त्वं तु न। स्थानप्रयत्नाभ्या-मन्तरतमेऽन्यत्र चरितार्थत्वात्। —*शर*. २३६; १६-१७

**यणादीति**। पूर्वसवर्णदीर्घ आदिशब्दार्थः। अयं पाठोऽनित्यः। 'अट्कुपु' इति सूत्रे अनुस्वारोपलक्षणनुम्ग्रहणात्।

अत एव 'हरिं जयति' इत्यादौ 'झलां जश् झशि' इति न, इति बोध्यम्; इति कश्चित्। —*लशर*. २८१-२८२

**अत एवेति**। अस्यानित्यत्वादेव, इत्यर्थः। 'स्थानप्रयत्नाभ्याम्' इत्यादि *मान्य-रत्नाकरा*द्युक्तिस्तु न युक्ता, इति भावः। 'झलां जशोऽन्ते' इत्येतद्दृष्ट्या तस्यासिद्धत्वा-दाह:—**झलां जश् झशीति**। —*भाप्र*. २८१

२८. किन्तु 'खरि' इति मण्डूकप्लुत्याऽनुवर्त्यम्, इति क्लेशः।
—*प्रौम*. २४४-२४५

**क्लेश इति**। समस्तैकदेशानुवृत्तिः, सन्निहितत्यागश्च क्लेशान्तरे बोध्ये।
—*शर*. २४५; १७

**इति क्लेश इति**। किञ्च पूस्तरेत्यादौ षत्वादिवारणाय 'कुप्वोः' इत्यनुवर्त्य 'तदन्तर्गते खरि' इति व्याख्याने सुतरां क्लेशः, इत्यपि बोध्यम्। —*लशर*. २९०

**सुतरामिति**। तथानुवृत्तिः एव एकः क्लेशः। 'समस्तैकदेशानुवृत्तिः, सन्नि-हितत्यागश्च क्लेशान्तरे' एवं व्याख्यानमधिकः क्लेशः, इत्यर्थः। —*भाप्र*. २९०

२९. सम्भवप्रदर्शनमेतत्, न तु परिगणनम्। अन्यस्यासम्भवात्।

—प्रौम. २४६; १-२

**अन्यस्येति।** इदं च *वृत्तिकारा*शयवर्णनमात्रम्। अत एव '*वृत्तिः*' इति स्वरूपग्रहणम्।

अत्र अरुचिबीजं तु, उरःपूर्वककाधातोः पाधातोश्च कप्रत्यये 'गतिकारकोपपदानाम्' इति वचनेन सुबुत्पत्तेः पूर्वं समासे अन्यस्यापि सम्भवात्। 'उरःकेण' इत्यादौ 'धनक्रीता' इत्यादाविव उक्तवचनस्यानित्यत्वेन सुबन्तेन समासे सत्वाभावो बोध्यः।

—शर. २४६; ८-१३

**अन्यस्यासम्भवादिति।** अयं भावः—अपदे इत्येव 'कुप्वोः' इत्यनुवर्त्य 'यस्मिन् विधिः' इति परिभाषया कपवर्गादौ अपदे इत्यर्थेन सिद्धे आदिग्रहणम् 'अपदस्यैवादिः' इत्यर्थलाभार्थम्। तेन 'उरः कायति' इति विग्रहे सुबुत्पत्तेः पूर्वं समासेऽपि 'उरःकेण' इत्यादौ न सत्वम्। आदिग्रहणसामर्थ्येन तल्लब्धावधारणेन च पदत्वयोग्यप्रातिपदिकानवयवस्यैव ग्रहणात्; इति।

—लशर. २९०-२९१

'उरःकेण' इत्यादौ तु 'धनक्रीता' इतिवत् समासेन निर्वाहः; इति *मान्योक्तिः* प्राचामनुरोधेन, इति सूचितम्।

—भाप्र. २९१

३०. 'इष्टादिभ्यश्च' इति सूत्रे 'अनिष्टी' इति प्रयोगसाधनार्थं 'पूर्वादिनिः' 'सपूर्वाच्च' इति योगविभागस्य चारितार्थ्येन ज्ञापकमपि दुर्निरूपम्।

—शर. २५८; १९-२०

न चास्यां मानाभावः। 'पूर्वात्सपूर्वादिनिः' इत्येकयोगेन सिद्धे पृथग्योगकरणस्य मानत्वात्। न च 'इष्टादिभ्यः' इत्यत्र अनुवृत्त्यर्थं तथा पाठः, अत एव 'अनिष्टी' इत्यादिसिद्धिः, इति वाच्यम्! ज्ञापकपर*भाष्य*प्रामाण्येन 'अनिष्टी' इत्यादिप्रयोगाणामनिष्टत्वात्।

—लशर. ३०७

३१. 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति 'ग्रहणवता' इति च परिभाषाद्वयमपि प्रत्ययविधिविषयकम्, इति 'दिव उत्' सूत्रे *कैयटहरदत्ता*भ्यामुक्तत्वाच्च।

—प्रौम. २५९; १-२

'येन विधिः' इति सूत्रे *भाष्ये* प्रत्ययविधिभिन्ने गृह्यमाणप्रातिपदिकेन तदन्तविधेर्बहुशो दर्शितत्वेन 'समासप्रत्ययविधौ प्रतिषेधः' इति निषेधानुवादकत्वमेव युक्तम्। तत्रैव सर्वत्र 'स्वस्य' इत्यनुवृत्त्यादिनैव सिद्धौ सूत्रोपात्तान्तशब्दे एव व्यपदेशिवद्भावनिषेधः, इति वदता *कैयटेन* तद्विषयत्वं स्पष्टमेवोक्तम्।

अत्र अरुचिबीजं तु 'पारमगोपुच्छिकम्' 'गौपुच्छिकम्' इत्यादाविष्टप्रत्ययानापत्तिः। आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक्' इति सूत्रे पर्युदासवृत्त्या प्रत्ययविधिविषयत्वात्। प्रसज्यप्रतिषेधमाश्रित्य निषेधकत्वकल्पनत्वे तु स्फुटमेव गौरवम्। ध्वनितं चेदम् 'असमासे निष्कादिभ्यः' इति सूत्रे *भाष्यकैयटयोः*। —शर. २५९; १०-१७

'येन विधिः' इति सूत्रे *कैयटेन* सूत्रोपात्तान्तादिशब्दविषयताऽस्य, इति वदता स्पष्टमेव प्रत्ययविधिविषयतोक्ता। 'असमासे निष्कादिभ्यः' इति सूत्रे *भाष्ये कैयटे* च स्पष्टमनयोः प्रत्ययविधिविषयता; इति दिक्। —लशर. ३०८-३०९

**अनयोः**—मूलोक्तपरिभाषयोः। असमासग्रहणप्रयोजनकथनावसरे 'आर्हादगोपुच्छ' इत्यत्र तदन्तविधौ, 'पारमगोपुच्छिकम्' इत्यत्र ठक्प्रतिषेधात् ठञ् फलम्, इत्युक्त्वा; तत्खण्डके विधौ प्रतिषेधः, प्रतिषेधश्चायम्, इति *भाष्ये* उक्ता ध्वनिता च। ........ एवञ्च मूले *कैयटहरदत्तेति* नारुचिबोधकम्।

एतेन "अत्र अरुचिबीजं तु 'पारमगोपुच्छिकम्' 'गौपुच्छिकम्' इत्यादाविष्टप्रत्ययानापत्तिः। 'आर्हादगोपुच्छ' इत्यस्य पर्युदासतया प्रत्ययविधिविषयत्वात्, प्रसज्यप्रतिषेधमाश्रित्य निषेधकत्वकल्पने तु स्फुटमेव गौरवम्" इति वदन्तो *मान्याः* प्राचामनुरोधेन, इति ध्वनितम्। उक्तभाष्यादिविरोधापत्तेः। —भाप्र. ३०८

३२. **बहुलग्रहणेति**। अत एव लोपं विना पादपूरणेऽपि क्वचिद् भवति।
—प्रौम. २७०; ६

**अत एवेति**। नियमाश्रयणं तु 'लोके लोपे सत्येव पादपूरणे लोपः, नान्यत्र' इत्येतदर्थम् इति भावः।

एतेन बहुलग्रहणात् लोपस्य क्वाचित्कत्वं कल्प्यम्; इत्यपास्तम्। छन्दस्यभावदर्शनेन लक्षणानां क्वाचित्कत्वकल्पनाया अन्यत्राऽदृष्टत्वात्। —शर. २७०; १७-२०

एवञ्च अवधारणपरतया न व्याख्येयम्; 'सोऽहमाजन्म' इत्यादौ बहुलग्रहणेन क्वचिदप्रवृत्त्याऽपि सिद्धेः; इति तात्पर्यम्। —लशर. ३२३

'छन्दस्यभावदर्शनेन लक्षणानां क्वाचित्कत्वकल्पनायाः काप्यदृष्टत्वात्। लोके लोपे सत्येव पादपूरणे लोपः, नान्यत्र; इत्येवंनियतशास्त्रार्थनियमस्य आवश्यकत्वाच्च; इति *मान्याः*; तत् प्राचामनुरोधेन। 'चतुर्विधं बाहुलकम्' इत्यभियुक्तोक्त्या बाहुलकस्थले मन्मते तथाऽर्थाङ्गीकारात्, पादस्य द्विविधस्याप्यत्र ग्रहणेनाविशेषाच्च, नियतशास्त्रार्थत्वस्यापि सिद्धेश्च। तद् ध्वनयन्नाह:—**एवं चेति**। बहुलग्रहणेन उक्तप्रयोगसाधने चेत्यर्थः।

—*भाप्र*. ३२३

## इति तृतीयं परिशिष्टम्

---

## ABBREVIATIONS

| | | |
|---|---|---|
| *प्रौम.* | *प्रौढमनोरमा* | Present edition. |
| *शर.* | *शब्दरत्न* | |
| *लशर.* | *लघुशब्दरत्न* | Kāśī Sanskrit Series. No. 125. |
| *भाप्र.* | *भावप्रकाश* | |
| *ŚR.* | *Śabdaratna* | Present edition. |

## CORRECTIONS

Page 275 : Read foot-note numbers 3 for 4 and 4 for 3.
Page 285, Line 14 : Read स्वमोर्लुक्कि, 'पञ्चक्रोष्टृ' for स्वमोलुक्कि, 'क्रोष्टृ'.
Page 299, Line 6 : Read –शर. for –लशर.

G. 796
13789